परे वा बंधुवर्गे वा मित्रे द्वेष्टरि वा सदा[९७] **।**
आस्ते यत्र कृपाबुद्धिर्दया सा परिकीर्तिता[९८]**।।४८।।**

(परे वा बन्धुवर्गे मित्रे वा द्वेष्टरि वा सदा यत्र कृपाबुद्धिः आस्ते सा दया परिकीर्तिता।)

दूसरों के प्रति, स्वजन एवं मित्र के प्रति अथवा शत्रु के प्रति सदैव करुणाबुद्धि रखना ही दया कहा गया है ।

विहितेषु तदन्येषु मनोवाक्कायकर्मणाम्[९९]**।**
प्रवृत्तौ वा निवृत्तौ वा एकरूपत्वमार्जवम्[१००]**।।४९।।**

(विहितेषु प्रवृत्तौ वा तत् अन्येषु निवृत्तौ वा मनो-वाक्-काय-कर्मणाम् एकरूपत्वं आर्जवम्।)

(शास्त्र) विहित में प्रवृत्ति तथा उससे अतिरिक्त में निवृत्ति इन में मन, वाणी और क्रिया की एकरूपता रहे तो उसे ही आर्जव कहते हैं।

अष्टौ ग्रासा मुनेरुक्ताः षोडशारण्यवासिनाम्[१०१]**।**
द्वात्रिंशच्च गृहस्थस्य यथेष्टं ब्रह्मचारिणाम्[१०२]**।**
उक्तमेतन्मिताहारमन्येषामल्पभोजनम्[१०३]**।।५०।।**

(मुनेः अष्टौ ग्रासाः, अरण्यवासिनां षोडशाः, गृहस्थस्य च द्वात्रिंशत्, ब्रह्मचारिणां यथेष्टम्, अन्येषां अल्पभोजनम्। एतत् मिताहारं उक्तम्।)

सन्यासियों के लिए आठ ग्रास (कौर), वानप्रस्थों के लिए सोलह ग्रास, गृहस्थों के लिए बत्तीस ग्रास तथा ब्रह्मचारियों के लिए यथेष्ट (आवश्यकतानुसार)। इससे अतिरिक्त लोगों के लिए पूर्णआहार से कम, इसे मिताहार कहते हैं।

(टिप्पणी - योग के मार्ग में आगे बढने के लिए मिताहार एक बहुत ही महत्त्वपूर्ण एवं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आवश्यक साधन माना गया है। यद्यपि पतंजलि के योगसूत्र में इसका कोई उद्धरण हमें नहीं मिलता किंतु बाद के हठयोगाचार्यों ने इस पर अधिक जोर दिया है तथा अपने-अपने दृष्टिकोण से इसकी व्याख्या भी प्रस्तुत की है। स्वामी चरणदास - जो हठयोग के प्रमुख आचार्य रहे हैं - ने मिताहार के अर्थ का सार बहुत संक्षेप में और सही ढ़ंग से प्रस्तुत करने का प्रयास किया है - क्षुधा मिटै नहि आलस आवै। प्रत्येक व्यक्ति को उतनी ही मात्रा में भोजन करना चाहिए जिससे उसकी भूख मिट ही जाए, साथ ही आलस्य की अनुभूति न हो।)

शौचं च द्विविधं प्रोक्तं बाह्यमाभ्यन्तरम् तथा[१०४]।
मृज्जलाभ्यां स्मृतं बाह्यं मनःशुद्धिं तथान्तरम्[१०५]।
मनःशुद्धिश्च विज्ञेया धर्मेणाध्यात्मविद्यया[१०६]।।५१।।

(शौचं द्विविधं प्रोक्तं, बाह्यं तथा आभ्यन्तरम् च मृज्जलाभ्यां बाह्यं स्मृतम्, तथा मनः शुद्धिं च आन्तरम्, मनः शुद्धिः धर्मेण अध्यात्मविद्यया विज्ञेया ।)

शौच दो प्रकार के कहे गए हैं - बहिरंग तथा अन्तरंग । मिट्टी और जल से बहिरंग तथा मन की शुद्धि को अन्तरंग शोच कहा गया है । वह मनःशुद्धि धर्माचरण तथा अध्यात्मविद्या के द्वारा प्राप्त्य है ।

प्रोक्ताः प्रीतेन ते भक्त्या अहिंसाद्या यमा दश[१०७]।।५२।।

(ते भक्त्या प्रीतेन अहिंसाद्या दश यमाः प्रोक्ताः ।)

तुम्हारी भक्ति से प्रसन्न होकर मैंने अहिंसा आदि दस यमों का वर्णन किया ।

तपः सन्तोषमास्तिक्यं दानमीश्वरपूजनम्[१०८]।
सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपो व्रतम्[१०९]।
नियमा दशधा प्रोक्तास्तांश्च सर्वान् पृथक् श्रृणु[११०]।।५३।।

(तपः सन्तोषम् आस्तिक्यं दानम् ईश्वरपूजनं सिद्धान्तश्रवणं च ह्री मतिः जपः व्रतं च दशधा नियमा प्रोक्ताः, तान् च सर्वान् पृथक् श्रृणु ।)

तप, सन्तोष, आस्तिकता, दान, ईश्वरपूजा, सिद्धान्तश्रवण, लज्जा, मति, जप और व्रत ये दस नियम कहे गए हैं। अब उन सबों को अलग-अलग सुनो ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विधिनोक्तेन मार्गेण कृच्छ्रचान्द्रायणादिना[१११]।
शरीरशोधनं प्राहुस्तपसां तप उत्तमम्[११२]।।५४।।

(कृच्छ्रचान्द्रायणादिना विधिना उक्तेन मार्गेण शरीरशोधनं तपसां उत्तमं तपः प्राहुः।

कठोर चान्द्रायण आदि व्रतों के द्वारा शास्त्रोक्त मार्ग से शरीर की शुद्धि को ही तपों में उत्तम तप कहा गया है।

(**टिप्पणी** - कृच्छ्र-कठोर, चान्द्रायण-चन्द्रमा की कला के अनुसार किया जाने वाला व्रत। इस विशेष व्रत को काफी कठिन माना जाता है क्योंकि जो व्यक्ति इस प्रकार का व्रत लेता है वह चन्द्रमा की कला के आधार पर भोजन ग्रहण करता है, अर्थात् प्रतिपाद में एक ग्रास और उसके आधार पर फिर बढ़ते-बढ़ते पूर्णिमा तक पन्द्रह ग्रास और फिर कृष्णपक्ष में क्रमशः घटते-घटते अमावस्या के दिन एक भी ग्रास नहीं लेना - इसे ही कृच्छ्र चान्द्रायण व्रत कहा जाता है ।)

यदृच्छालाभसन्तुष्टं मनः पुंसां भवेदिति[११३]।
या धीस्तामृषयः प्राहुः सन्तोषं सुखलक्षणम्[११४]।।५५।।

(यदृच्छालाभसन्तुष्टं पुंसां मनः भवेत् इति या धीः ताम् ऋषयः सुखलक्षणं सन्तोषं प्राहुः।)

अनायास लाभ स्थिति में जिस मनुष्य का मन संतुष्ट रहे ऐसी बुद्धि को ही ऋषिगण सुखाकारक संतोष कहते हैं ।

धर्माधर्मेषु विश्वासो यस्तदास्तिक्यमुच्यते[११५]।।५६।।

(धर्माधर्मेषु यः विश्वासः तत् आस्तिक्यं उच्यते ।)

धर्म (कर्त्तव्य) और अधर्म (अकर्त्तव्य) में विश्वास रखना ही आस्तिकता है ।

न्यायार्जितं धनं धान्यमन्यद्वा यत् प्रदीयते[११६]।
आर्तेभ्यः श्रद्धया युक्तो दानमेतत् प्रकीर्तितम्[११७]।।५७।।

(न्यायार्जितं धनं धान्यं अन्यत् वा आर्तेभ्यः श्रद्धया युक्तः यत् प्रदीयते एतत् दानं प्रकीर्तितम् ।)

न्याय से अर्जित धन-धान्य या अन्य कोई वस्तु श्रद्धापूर्वक आतुरों को जो दिया जाता है - उसे ही दान कहा गया है ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यत् प्रसन्नस्वभावेन विष्णोरभ्यर्चनं तथा[११८]।
यथावदर्चनं भक्त्या एतदीश्वरपूजनम्[११९]।।५८।।

(प्रसन्नस्वभावेन तथा भक्त्या यत् विष्णोः यथावत् अभ्यर्चनं अर्चनं एतत् ईश्वरपूजनम् ।)

प्रसन्नचित्त तथा भक्तिपूर्वक विष्णु की शास्त्रोक्त विधि से पूजा-अर्चना करना ही ईश्वरपूजन है ।

रागादपेतं हृदयं वागदुष्टानृतादिना[१२०]।
हिंसादिरहितं कायमेतदीश्वरपूजनम्[१२१]।।५९।।

(हृदयं रागात् अपेतं वाक् अनृतादिना अदुष्टा, कायं हिंसादि रहितं, एतत् ईश्वरपूजनम्।)

अन्तःकरण का रागरहित होना, वाणी का असत्यादि भाषण से दूषित न होना तथा शरीर का हिंसा आदि से रहित होना यह ईश्वरपूजन है।

सिद्धान्तश्रवणं प्रोक्तं वेदान्तभावनं तु वै[१२२]।।६०।।

(वेदान्तभावनं वै तु सिद्धान्तश्रवणं प्रोक्तम्।)

वेदान्त-चिन्तन को ही सिद्धान्तश्रवण कहा गया है ।

स्वकीयशाखाध्ययनमितिहासपुराणयोः।
अधीतस्य तथान्यस्य सिद्धान्तश्रवणं भवेत्।।६१।।

(स्वकीय शाखा (तथा च) इतिहास-पुराणयोः अध्ययनं तथा अन्यस्य अधीतस्य सिद्धान्तश्रवणं भवेत् ।)

अपने-अपने (वैदिक) शाखा का अध्ययन, इतिहास पुराणों का अध्ययन तथा अन्य सद्ग्रन्थों का भी अध्ययन करना सिद्धान्तश्रवण कहा जाता है ।

वेदलौकिकमार्गेषु कुत्सितं कर्म यद्भवेत्[१२३]।
तस्मिन् भवति या लज्जा ह्रीः सैवेति प्रकीर्तिता[१२४]।।६२।।

(वेदलौकिकमार्गेषु यत् कर्म कुत्सितं भवेत् तस्मिन् या लज्जा भवति स एव ह्रीः इति प्रकीर्तिता ।)

वेदाचार और लोकाचार में जो कर्म निन्दित हैं, उसमें लज्जा होने को ही ह्री कहा गया है ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विहितेषु च सर्वेषु श्रद्धया या मतिर्भवेत्[१२५]।
गुरुणा चोपदिष्टेन यद्बाह्यं तद्विवर्जयेत्[१२६]।।६३।।

(विहितेषु सर्वेषु च श्रद्धया गुरुणा उपदिष्टेन च बाह्यं यत् विवर्जयेत् तत् या (सा) मतिः भवेत्।)

शास्त्रविहित सभी कर्मों में निष्ठा और गुरु के आदेश के अतिरिक्त (कर्म) का त्याग करना ही मति है ।

विधिनोक्तेन मार्गेण मन्त्राभ्यासो जपः स्मृतः[१२७]।
जपश्च त्रिविधः प्रोक्त उच्चैरुपांशु मानसः[१२८]।।६४।।

(विधिना उक्तेन मार्गेण मन्त्राभ्यासः जपः स्मृतः, जपः च त्रिविधः प्रोक्तः, उच्चैः उपांशु मानसः च एव ।

शास्त्रोक्त विधि से मन्त्र का अभ्यास करना जप कहा गया है । जप तीन प्रकार के कहे गए हैं - उच्च, उपांशु और मानस ।

उच्चैर्जपादुपांशुश्च सहस्रगुणमुच्यते[१२९]।
सहस्रगुणमुत्कृष्टं तस्मादपि च मानसः[१३०]।।६५।।

(उच्चैः जपात् सहस्रगुणं उपांशुः च उच्यते तस्मात् अपि सहस्रगुणं उत्कृष्टं मानसः च (उच्यते)।)

जोर-जोर से जप करने से हजार गुना अच्छा उपांशु जप (मन्द जप) कहा गया है और उससे भी हजार गुना अच्छा मानस जप कहा गया है ।

प्रसन्नगुरुणा पूर्वमुपदिष्टोऽभ्यनुज्ञया[१३१]।
धर्मार्थकामसिद्ध्यर्थमुपायग्रहणं व्रतम्[१३२]।।६६।।

(प्रसन्नगुरुणा पूर्वं उपदिष्टः अभि-अनुज्ञया धर्म-अर्थ-काम-सिद्धि-अर्थम् - उपायग्रहणं व्रतम् ।)

प्रसन्नचित्त गुरु द्वारा पूर्व प्राप्त उपदेश और आज्ञा के अनुसार धर्म, अर्थ और काम की सिद्धि के लिए अनुष्ठान का आचरण व्रत है ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आसनानि च वक्ष्यामि श्रृणु पुत्र समाहितः[१३४]।
स्वस्तिकं गोमुखं पद्मं वीरं सिंहासनं तथा[१३५]।
मायूरं कुक्कुटं चैव कूर्मं भद्रासनं तथा[१३६]।
मुक्तासनं तथा तेषां पृथक् वक्ष्यामि लक्षणम्[१३७]।।६७।।

(पुत्र ! आसनानि च वक्ष्यामि समाहितः श्रृणु, स्वस्तिकं, गोमुखं, पद्मं, वीरं, सिंहासनं तथा मायूरं कुक्कुटं च एव कूर्मं, भद्रासनं तथा मुक्तासनं प्रोक्तं, तेषां पृथक् लक्षणं वक्ष्यामि।)

हे पुत्र । अब आसनों का वर्णन करुँगा। इसे एकाग्रचित्त होकर सुनो। स्वस्तिक, गोमुख, पद्म, वीर, सिंहासन, मयूर, कुक्कुट, कूर्म, भद्र तथा मुक्त ये (दस) आसन कहे गए हैं। अब इनका अलग-अलग वर्णन करूँगा ।

जानूर्वोरन्तरं सम्यक् कृत्वा पादतले उभे[१३८]।
ऋजुकायस्तथासीनः स्वस्तिकं तत् प्रचक्षते[१३९]।।६८।।

(जानु-ऊर्वोः अन्तरे उभे पादतले सम्यक् कृत्वा तथा ऋजुकायः आसीनः तत् स्वस्तिकं प्रचक्षते।)

घुटनों और जांघ के बीच में दोनों तलवे को अच्छी प्रकार रखकर तथा शरीर को सीधा रखते हुए बैठने को स्वस्तिक (आसन) कहते हैं -

सीवन्यामात्मनः पार्श्वे गुल्फौ निक्षिप्य पादयोः[१४०]।
एतद्वा स्वस्तिकं प्रोक्तं सर्वपापप्रणाशनम्[१४१]।।६९।।

(वा आत्मनः सीवन्यां पार्श्वे पादयोः गुल्फौ निक्षिप्य एतत् स्वस्तिकं सर्वपापप्रणाशनं प्रोक्तम्।)

अथवा अपनी सीवनी के समीप दोनों पाँवों के टखनों को रखकर भी जो स्वास्तिक (आसन होता है) सभी पापों को नाश करने वाला कहा गया है।

सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे निवेशयेत्[१४२]।
दक्षिणेऽपि तथा सव्यं गोमुखं तत् प्रचक्षते[१४३]।।७०।।

(पृष्ठपार्श्वे सव्ये तु दक्षिणगुल्फं निवेशयेत् तथा दक्षिणे अपि सव्यं तत् गोमुखं प्रचक्षते।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पीठ के समीप बाँई ओर दाहिना रखना और उसी प्रकार दाहिनी ओर बाँया रखने पर गोमुख आसन कहा जाता है।

अङ्गुष्ठौ च निबध्नीयाद्धस्ताभ्यां व्युत्क्रमेण तु[१४४]।
ऊर्वोरुपरि विप्रेन्द्र कृत्वा पादतले उभे[१४५]।
पद्मासनं भवेदेतत् सर्वेषामेव पूजितम्[१४६]।।७१।।

(विप्रेन्द्र, ऊर्वोः उपरि उभे पादतले कृत्वा च हस्ताभ्यां तु अङ्गुष्ठौ च व्युत्क्रमेण निबध्नीयात्। एतत् सर्वेषाम् एव पूजितं पद्मासनं भवेत्।)

हे विप्रेन्द्र, जाँघों के ऊपर दोनों तलवे रखकर एवं बाएँ हाथ से दाएँ तथा दाएँ हाथ से बाएँ अंगूठे को पकड़कर आसन करने से पद्मासन होता है, जो सभी के द्वारा पूजित अर्थात् करणीय है।

एकं पादमथैकस्मिन् विन्यस्योरौ च संस्थितम्[१४७]।
इतरस्मिंस्तथैवोरुं वीरासनमितीरितम्[१४८]।।७२।।

(एकस्मिन् उरौ एकं पादम् विन्यस्य अथ च इतरस्मिन् उरू तथैव संस्थितं इति वीरासनं ईरितम्।)

एक जांघ के ऊपर एक पाँव तथा दूसरे पाँव पर दूसरे जाँघ को रखकर बैठने से वीरासन होता है।

गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत्[१४९]।
दक्षिणं सव्यगुल्फेन दक्षिणेनेतरेतरम्[१५०]।।७३।।
हस्तौ जानौ च संस्थाप्य स्वाङ्गुलीश्च प्रसार्य च[१५१]।
व्यात्तवक्त्रौ निरीक्षेत नासाग्रं सुसमाहितः[१५२]।।७४।।
सिंहासनं भवेदेतत् पूजितं योगिभिः सदा[१५३]।।७५।।

(गुल्फौ वृषणस्य अधः सीवन्याः पार्श्वयोः च क्षिपेत्। दक्षिणेन सव्यगुल्फेन इतरेतरं दक्षिणं (संस्थाप्य) हस्तौ जानौ च संस्थाप्य स्व-अङ्गुलीः प्रसार्य च व्यात्तवक्त्रः सुसमाहितः च नासाग्रं निरीक्षेत । एतत् सदा योगिभिः पूजितं सिंहासनं भवेत् ।)

दोनों टखनों को अण्डकोष के नीचे, सीवनी के दोनों भाग में रखकर, दाहिने भाग में बाएँ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

और बाएँ भाग में दाहिने टखने को रखकर, हाथों को घुटनों पर रखकर, अंगुलियों को फैलाकर और मुँह फाड़कर एकाग्रचित्त से नासाग्र की ओर दृष्टि रखे यह योगियों से सदा पूजित सिंहासन होता है ।

अवष्टभ्य धरां सम्यक् तलाभ्यां च करद्वयम्[१५४] **।**
हस्तयोः खर्परे चापि स्थापयेन्नाभि पार्श्वयोः[१५५] **।।७६।।**
समुन्नतशिरः पादो दण्डवद् व्योम्नि संस्थितः[१५६] **।**
मयूरासनमेतद्धि सर्वपाप विनाशनम्[१५७] **।।७७।।**

(कर द्वयं तलाभ्यां धरां च सम्यक् अवष्टभ्य, हस्तयोः खर्परे नाभिपार्श्वयोः अपि च स्थापयेत्, समुन्नत शिरः पादः दण्डवद् व्योम्नि संस्थितः एतद् हि सर्वपाप विनाशनं मयूरासनम्)

दोनों हाथों की हथेलियों को भूमि पर स्थापित कर नाभी के दोनों ओर हाथों की कोहनियों को अच्छी तरह लगाऐं (तथा) सिर एवं पाँव को समरुप उठाते हुए दण्ड के समान अधर में स्थित रहे । इसी को हि सभी पापों का नाश करनेवाला मयूरासन कहा जाता है ।

पद्मासनं समास्थाय जानूर्वोरन्तरे करौ।
भूमौ निवेश्य संस्थाप्य व्योमस्थं कुक्कुटासनम्[१५८] **।।७८।।**

(पद्मासनं समास्थाय जानु-उर्वोः अन्तरे करौ निवेश्य भूमौ संस्थाप्य च व्योमस्थं कुक्कुटासनम्।)

पद्मासन लगाकर घुटना और जाँघ के बीच से हाथों को ले जाकर भूमि के ऊपर रखकर अधर में उठे रहने से कुक्कुटासन होता है।

गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपन्[१५९]**।**
पार्श्वपादौ च पाणिभ्यां दृढं बद्ध्वा सुनिश्चलम्[१६०]**।**
भद्रासनं भवेदेतत् सर्वव्याधिविषापहम्[१६१]**।।७९।।**

(वृषणस्य अधः सीवन्याः पार्श्वयोः गुल्फौ क्षिपन् च पार्श्वपादौ पाणिभ्यां दृढं सुनिश्चलं बद्ध्वा च एतत् सर्वव्याधिविषापहं भद्रासनं भवेत्।)

अण्डकोष के नीचे, सीवनी के दोनों ओर दोनों टखनों को रखें और समीपस्थ पाँवों को दोनों हाथों से दृढ़ता तथा स्थिरता से पकड़ें - यह सभी रोगों और विषों को दूर करनेवाला भद्रासन होता है।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुदं निरुध्य गुल्फाभ्यां व्युत्क्रमेण समाहितः[१६२]।
कूर्मासनं भवेदेतदिति योगविदो विदुः[१६३]।।८०।।

(व्युत्क्रमेण गुल्फाभ्यां गुदं निरुध्य समाहितः (सन्) एतत् कूर्मासनं भवेत् इति योगविदो विदुः।)

पाँव को बाहर की ओर उलट कर दोनों टखनों से गुदा को दबाकर एकाग्रचित्त होकर रहें, इसे ही योगी लोग कूर्मासन कहते हैं।

मेढ्रादुपरि निक्षिप्य सव्यं गुल्फं तथोपरि[१६४]।
गुल्फान्तरं विनिक्षिप्य मुक्तासनमिदं स्मृतम्[१६५]।।८१।।

(सव्यं गुल्फं मेढ्रात् उपरि निक्षिप्य तथा- उपरि गुल्फान्तरं विनिक्षिप्य इदं मुक्तासनं स्मृतम् ।)

बाएँ टखने को लिङ्ग के ऊपर रखें और उसके ऊपर दूसरे टखने को अच्छी प्रकार रखें । इसे मुक्तासन कहा गया है ।

सम्पीड्य सीवनीं सूक्ष्मां गुल्फेनैव तु सव्यतः[१६६]।
सव्यं दक्षिणगुल्फेन मुक्तासनमिदं तु वा[१६७]।।८२।।

(वा सव्यतः गुल्फेन सूक्ष्मां सीवनीं सम्पीड्य तु दक्षिणगुल्फेन सव्यं (सम्पीड्य) इदं तु मुक्तासनम्।)

अथवा बायें टखने से सीवनी के सूक्ष्म भाग को तथा दाएँ टखने से बाएँ भाग को दबाकर भी मुक्तासन होता है ।

यमैश्च नियमैश्चैव आसनेन च संयुतः[१६८]।
कृत्वा तु नाडिकाशुद्धिं प्राणायामं ततः कुरु[१६९]।।८३।।

(यमैः नियमैः च आसनेन च एव संयुतः नाडिकाशुद्धिं तु कृत्वा ततः च प्राणायामं कुरु।)

यम, नियम और आसन का अभ्यास करने के बाद नाड़ीशुद्धि करने के अनन्तर ही प्राणायाम का अभ्यास करना चाहिए।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्राणायामादि सर्वाणि योगाङ्गानि प्रकुर्वतः[१७०]।
वृथा क्लेशो भवेत्तस्य नाडीशुद्धिमकुर्वतः[१७१]।।८४।।

(नाड़ीशुद्धिं अकुर्वतः प्राणायामादि सर्वाणि योग-अङ्गानि प्रकुर्वतः तस्य वृथा क्लेशः भवेत्।)

नाड़ीशुद्धि का अभ्यास न करते हुए प्राणायाम आदि आगे के सभी योगाङ्गों के अभ्यास करने वाले का श्रम व्यर्थ ही होता है ।

☀ इति वसिष्ठसंहितायां योगकाण्डे प्रथमोऽध्यायः
इस प्रकार वसिष्ठसंहिता योगकाण्ड का
प्रथम अध्याय समाप्त हुआ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वितीयोऽध्यायः[१]

शक्तिरुवाच[२] -

भगवन् ब्रूहि मे तात नाडीशुद्धिं विधानतः[३]।
केनोपायेन शुद्धाः स्युर्नाडयः सर्वदेहिनाम्[४]।।१।।

शक्ति उवाच -

(भगवन् तात! सर्वदेहिनां नाडयः केन उपायेन शुद्धाः स्युः? नाडीशुद्धिं विधानतः मे ब्रूहि।)

शक्ति बोले -

हे भगवन्, तात, देहधारियों की नाड़ियों की शुद्धि किस उपाय से होगी? नाड़ीशुद्धि की प्रक्रिया विधिपूर्वक मुझसे कहें।

उत्पत्तिं चापि नाडीनां धारणं च यथाविधि[५]।
कन्दं तु कीदृशं प्रोक्त कति तिष्ठन्ति वायवः[६]।।२।।

(नाड़ीनां उत्पत्तिं, अपि च यथाविधि धारणं, कन्दं तु कीदृशं प्रोक्तं, (शरीरे) कति वायवः च तिष्ठन्ति।)

नाड़ियों की उत्पत्ति एवं उनके अनुरक्षण की विधि क्या है ? कन्द का रूप क्या है ? और (शरीर में) कितने वायु होते हैं ?

स्थानानि चैव वायूनां कर्माणि च पृथक् पृथक्[७]।
विज्ञातव्यानि यान्यस्मिन् देहे देहभृतां वर[८]।।
वक्तुमर्हसि तत्त्वेन त्वत्तो वेत्ता न विद्यते[९]।।३।।

(वायूनां स्थानानि पृथक् पृथक् कर्माणि च एव देहभृतां अस्मिन् देहे यानि च विज्ञातव्यानि, (हे) वर, तत्वेन वक्तुं अर्हसि (यतः) त्वत्तो वेत्ता न विद्यते।)

वायुओं के स्थान, उनके अलग-अलग कार्य तथा हे मुनिश्रेष्ठ । देहधारियों के इस शरीर में जो कुछ भी जानने लायक हो वह मुझे यथार्थ रूप से कहो, (क्योंकि) आपके समान दूसरा ज्ञानी नहीं है ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्युक्तः शक्तिना योगी सम्यक् तद्गतमानसः[१०]।
स्वात्मजं कृपयालोक्य तत्सर्वमन्वभाषत[११]।।४।।

(शक्तिना इति उक्तः सम्यक् तत्-गतमानसः योगी स्व-आत्मजं कृपया आलोक्य तत् सर्वं अन्वभाषत ।)

शक्ति के इस प्रकार कहने पर, प्रश्न को भली प्रकार समझने वाले योगी, (वसिष्ठ जी) ने अपने पुत्र को कृपादृष्टि से देखकर, उन सबों का क्रमशः उत्तर देना आरम्भ किया ।

वसिष्ठ उवाच[१२] -

शरीरं तावदेवं हि षण्णवत्यङ्गुलात्मकम्[१३] ।
विद्ध्येतत् सर्वजन्तूनां स्वाङ्गुलीभिरिति द्विज[१४]।।५।।

(द्विज ! सर्वजन्तूनां शरीरं हि तावत् स्व-अङ्गुलिभिः षट्-नवति-अङ्गुलात्मकं इति एवं एतत् विद्धि ।)

वसिष्ठ बोले -

हे द्विज, प्रत्येक जीव का शरीर अपने अंगुली से छ्यानवे (९६) अंगुली माप का होता है, यह जानो ।

देहे द्वात्रिंशदस्थीनि वंशस्य पार्श्वयोर्द्वयोः[१५] ।
द्विसप्ततिसहस्राणि नाडीनामपि संस्थितिः[१६] ।।६।।

(देहे वंशस्य द्वयोः पार्श्वयोः द्वात्रिंशत् अस्थीनि, अपि द्विसप्तति सहस्राणि नाडीनाम् संस्थितिः (विद्यते)।)

शरीर में पृष्ठवंश के दोनों ओर बत्तीस (३२) अस्थियाँ हैं, और बहत्तर हजार नाड़ियाँ हैं।

शरीरादधिकः प्राणो द्वादशाङ्गुलसम्मितः[१७] ।
प्रयाणं कुरुते वायुस्तस्मात् प्राण इतीरितः[१८] ।।७।।

(प्राणः वायुः शरीरात् द्वादश अङ्गुल सम्मितः अधिकः (वा) प्रयाणं कुरूते तस्मात् प्राण इति ईरितः ।)

प्राण वायु शरीर से बारह अंगुल पर्यन्त या उस से अधिक प्रयाण (आना-जाना) करता

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

है, इसीलिए उसे प्राण कहा जाता है।

देहमध्ये शिखिस्थानं तप्तजाम्बूनदप्रभम्[१९] ।
त्रिकोणं मनुजानां च चतुरस्त्रं चतुष्पदाम्[२०] ।
मण्डलं तद्विहङ्गानां सत्यमेतद् ब्रवीमि ते[२१] ।।८।।

(देहमध्ये तप्तजाम्बूनदप्रभं शिखिस्थानं, तत् मनुजानां त्रिकोणं, चतुष्पदां च चतुरस्त्रं, विहङ्गानां (च) मण्डलं, एतत् ते सत्यं ब्रवीमि।)

देह मध्य में तप्त स्वर्ण के समान ज्योतिर्मय स्थान है। वह मानवों में त्रिकोणात्मक, पशुओं में चौकोर तथा पक्षियों में गोलाकार होता है - यह मैं तुम्हें सत्य कहता हूँ।

तन्मध्ये तु शिखा तन्वी सदा तिष्ठति पावकी[२२] ।
देहमध्यं तु कुत्रेति श्रोतुमिच्छसि चेत् शृणु[२३] ।।९।।

(तत् मध्ये तु तन्वी पावकी शिखा सदा तिष्ठति, देहमध्यं तु कुत्र इति श्रोतुं इच्छसि चेत् शृणु ।)

उसके बीच में अग्नि की पतली ज्योति सदा विद्यमान रहती है। वह देहमध्य कहाँ है - यह यदि सुनना चाहते हो तो सुनो -

गुदात्तु द्व्यङ्गुलादूर्ध्वमधो मेढ्रात्तु द्व्यगुलात्[२४] ।
एकाङ्गुलं तु तन्मध्ये देहमध्यमितीरितम्[२५] ।।१०।।

(गुदात् तु द्वि-अङ्गुलात् ऊर्ध्वं मेढ्रात् तु द्वि-अङ्गुलात् अधः, तत् मध्ये एक-अङ्गुलं तु देहमध्यं इति ईरितम्।)

गुदा से दो अङ्गुल ऊपर और लिङ्ग से दो अङ्गुल नीचे, इसके बीच के एक अङ्गुल स्थान को देहमध्य ऐसा कहा गया है।

कन्दमस्ति शरीरेऽस्मिन् देहमध्यान्नवाङ्गुलम्[२६] ।
चतुरङ्गुलमुत्सेधमायतं च तथाविधम्[२७] ।।११।।

(अस्मिन् शरीरे देहमध्यात् नव अङ्गुलं (उपरि) चतुरङ्गुलम् उत्सेधं तथाविधम् आयतं च कन्दम् अस्ति ।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इस शरीर में देहमध्य से नौ अंगुल (ऊपर), चार अंगुल ऊँचा और चार अंगुल फैला हुआ कन्द है।

अण्डाकृतिवदाकारं त्वगस्थिपरिभूषितम्[२८] ।
तन्मध्यं नाभिरित्युक्तं तस्माच्चक्रसमुद्भवः[२९] ।।१२।।

(अण्ड-आकृति-वत् आकारं त्वक्-अस्थि-परिभूषितं तत् (कन्द) मध्यं नाभिः इति उक्तं, तस्मात् चक्र समुद्भवः।)

अण्डाकृति के समान तथा त्वचा और अस्थि से सुशोभित उस कन्द के मध्यभाग को नाभि कहते हैं । उस (नाभि) से चक्र का प्रादुर्भाव होता है ।

द्वादशारयुतं चक्रं देहस्तेन प्रतिष्ठितः[३०] ।
चक्रेऽस्मिन् भ्रमते जीवः पुण्यपापप्रचोदितः[३१] ।।१३।।

(चक्रं द्वादश-आर-युतं, तेन देहः प्रतिष्ठितः, अस्मिन् चक्रे पुण्य-पाप-प्रचोदितः जीवः भ्रमते ।)

चक्र बारह आरों से युक्त है और उसके कारण ही देह की स्थिति है । इसी चक्र में पुण्य-पाप से प्रेरित जीव घूमता रहता है ।

तन्तुपञ्जरमध्यस्थो यथा भ्रमति लौतिकः[३२] ।
जीवस्य मूलचक्रेऽस्मिन्नधः प्राणश्चरत्यसौ[३३] ।।१४।।

(यथा तन्तु-पञ्जर-मध्यस्थः लौतिकः भ्रमति तथा असौ प्राणः जीवस्य अस्मिन् मूलचक्रे अधः चरति ।)

जैसे तन्तुओं के जाल के बीच में बैठी हुई मकड़ी भटकती रहती है, उसी प्रकार यह प्राण जीव के इस मूलचक्र के नीचे घूमता रहता है ।

प्राणादृढो भवेज्जीवः सर्वदेहेषु सर्वदा[३४] ।
तस्योर्ध्वं कुण्डलीस्थानं नाभेस्तिर्यगधोर्ध्वतः[३५] ।।१५।।

(जीवः सर्वदेहेषु सर्वदा प्राणात् दृढः भवेत्, तस्य ऊर्ध्वं कुण्डली-स्थानं (यः) नाभेः तिर्यक्-अधः-ऊर्ध्वतः (विद्यते)।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जीव सभी शरीरों में सर्वदा प्राण से ही दृढ़ होता है, उस (मूलचक्र के) ऊपर में कुण्डली का स्थान है जो नाभि के ऊपर नीचे इधर-उधर फैली हुई है ।

अष्टप्रकृतिरूपाऽसावष्टधा कुण्डलीकृता[३६] ।
अकारादिक्षकारान्ता कुण्डलीत्यभिधीयते[३७] ।
यथावद्वायुचारं च निरुध्यैषा सदा स्थिता[३८] ।।१६।।

(अष्टप्रकृतिरूपा, अकार-आदि-क्षकार-अन्ता अष्टधा कुण्डलीकृता असौ कुण्डली इति अभिधीयते च वायुचारं निरुध्य एषा सदा यथावत् स्थिता ।)

आठ प्रकृतिवाली, अकार से क्षकार तक (बीजाक्षरयुक्त), आठ बार कुण्डलित होने के कारण वह कुण्डली नाम से कही जाती है और वह सुषुम्मामें वायु के संचार को रोककर सदा यथावत् अर्थात् कुण्डालाकर रूप में स्थित है ।

टिप्पणी - अ और क्ष देवनागरी लिपि का प्रथम और अन्तिम अक्षर हैं। इन दोनों के बीच पूरी वर्णमाला आ जाती है, जो ज्ञान का मूल स्रोत है। कुण्डली को अ से क्ष के बीच वर्णन करने का अभिप्राय यह है कि यह ज्ञान का मूल स्रोत है।

मुखेन सा समावेष्ट्य ब्रह्मरन्ध्रमुखं तथा[३९] ।
योगकाले त्वपानेन प्रबुद्धा सह वह्निना[४०] ।।१७।।

(सा मुखेन ब्रह्मरन्ध्रमुखं समावेष्ट्य (स्थिता) तथा योगकाले तु अपानेन वह्निना सह प्रबुद्धा ।)

वह मुख के द्वारा ब्रह्मद्वार को ढ़ककर स्थित है और योगाभ्यासकाल में अपान वायु के द्वारा अग्नितत्व के साथ जगती है ।

स्फुरन्ती हृदयाकाशान्नागरूपा महोज्जवला[४१] ।
योगिनां हृदयाकाशे नृत्यन्ती नित्यमध्यमा[४२] ।
वायुर्वायुसखेनैव ततो याति सुषुम्णया[४३] ।।१८।।

(नित्यमध्यमा, योगिनां हृदयाकाशे नृत्यन्ती, हृदयाकाशात् महोज्जवला नागरूपा स्फुरन्ती, वायुः वायुसखेन एव ततः सुषुम्णया याति ।)

सदा मध्य में रहने वाली, योगियों के हृदयाकाश में विचरण करती हुई और हृदयाकाश

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

में महातेजस्वी नाग के समान भासमान होने वाली, हवा जैसे अपने मित्र अग्नि की सहायता से तीव्र गति से चलती है, वैसे ही वह सुषुम्णा मार्ग से प्रवाहित होती है ।

कन्दमध्ये स्थिता नाड़ी सुषुम्णेति प्रकीर्तिता[४४] ।
तिष्ठन्ति परितः सर्वाश्चक्रेऽस्मिन्नाडिसंज्ञके[४५] ।।१९।।

(कन्दमध्ये स्थिता नाड़ी सुषुम्णा इति प्रकीर्तिता, अस्मिन् नाडिसंज्ञके चक्रे परितः सर्वाः (नाड्यः) तिष्ठन्ति ।)

कन्द के बीच में स्थित नाड़ी सुषुम्णा नाम से कही जाती है । इस नाड़ी रूपी चक्र के चारों ओर सभी नाड़ियाँ रहती हैं ।

नाडीनामपि सर्वासां मुख्याः पुत्र चतुर्दश[४६] ।।२०।।

(पुत्र, सर्वासां नाडीनाम् अपि चतुर्दश मुख्याः ।)
हे पुत्र, सभी नाड़ियों में भी चौदह नाड़ियां मुख्य हैं ।

सुषुम्णेडा ततः पश्चात् पिङ्गला च सरस्वती[४७] ।।२१।।

(सुषुम्णा इडा ततः पश्चात् पिङ्गला सरस्वती च-)
वे हैं - सुषुम्णा, इडा उसके बाद पिङ्गला, सरस्वती-

कुहूश्च वरणा चैव सप्तमी च यशस्विनी[४८] ।
पूषा पयस्विनी चैव शङ्खिनी दशमी तथा[४९] ।।२२।।

(कुहूः वरणा च एव सप्तमी च यशस्विनी पूषा पयस्विनी तथा दशमी चैव शङ्खिनी ।)

कुहू, वरणा, सातवीं यशस्विनी, पूषा, पयस्विनी और दसवीं शङ्खिनी -

गान्धारी हस्तिजिह्वा च तथा विश्वोदरा स्मृता[५०] ।
अलम्बुषा च सर्वासां मुख्यास्त्वेताश्चतुर्दश[५१] ।।२३।।

(गान्धारी हस्तिजिह्वा तथा विश्वोदरा अलम्बुषा च एता चतुर्दश तु सर्वासां मुख्याः स्मृता ।)

गान्धारी, हस्तिजिह्वा, विश्वोदरा और अलम्बुशा ये चौदह (नाड़ियाँ) सभी में मुख्य हैं ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तासु मुख्यतमास्तिस्त्रस्तिसृष्वेकोत्तमा मता[५२] ।
मुक्तिमार्गे सुषुम्णा सा ज्वलन्ती विश्वधारिणी[५३] ।।२४।।

(तासु मुख्यतमाः तिस्रः, तिसृषु एका मुक्तिमार्गे उत्तमा मता, सा ज्वलन्ती सुषुम्णा विश्वधारिणी विद्यते।)

उनमें भी सर्वप्रमुख तीन हैं और तीनों में भी एक मोक्ष मार्ग के लिए सर्वोत्तम मानी गई है । वह तेजस्विनी सुषुम्णा विश्व (शरीर) के आधारभूत रूप में विद्यमान है ।

कन्दस्य मध्यमे पुत्र सुषुम्णा सुप्रतिष्ठिता[५४] ।
पृष्ठमध्यस्थितेनास्थ्ना सह मूर्ध्नि स्थिता सदा[५५] ।।२५।।

(पुत्र, कन्दस्य मध्यमे सुषुम्णा सुप्रतिष्ठिता, (सा) पृष्ठ-मध्य-स्थितेन अस्थ्ना सह मूर्ध्नि सदा स्थिता।)

हे पुत्र, कन्द के बीच में सुषुम्णा अच्छी तरह प्रतिष्ठित है। वह पीठ की अस्थि (रीढ़ की हड्डी) के साथ मस्तक तक सदा विद्यमान रहती है।

मोक्षपन्थाः सुषुम्णा सा ब्रह्मरन्ध्रे प्रकीर्तिता[५६] ।
अव्यक्ता चैव विज्ञेया सूक्ष्मा सा वैष्णवी स्मृता[५७] ।।२६।।

(ब्रह्मरन्ध्रे प्रकीर्तिता सा सुषुम्णा मोक्षपन्थाः विज्ञेया । सूक्ष्मा अव्यक्ता वैष्णवी च एव सा स्मृता ।)

ब्रह्मरन्ध्र में स्थित वह सुषुम्णा मोक्ष मार्ग की ओर ले जानेवाली कही गई है। वह सुषुम्णा सूक्ष्म अव्यक्त तथा वैष्णवी (विष्णुतत्व प्रापक) कही गई है ।

इडा च पिङ्गला चैव तस्याः सव्ये च दक्षिणे[५८] ।
इडा तस्याः स्थिता सव्ये दक्षिणे पिङ्गला स्थिता[५९] ।।२७।।

(तस्याः सव्ये च दक्षिणे च इडा पिङ्गला एव च, इडा तस्याः सव्ये स्थिता दक्षिणे पिङ्गला स्थिता ।)

उसके बाएँ और दाएँ भाग में इडा और पिङ्गला हैं। बाएँ भाग में इडा और दाएँ भाग में पिङ्गला (नाड़ी) स्थित है ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इडायां पिङ्गलायां च चरतश्चन्द्रभास्करौ[६०] ।
इडायां चन्द्रमा ज्ञेयः पिङ्गलायां रविः स्मृतः[६१] ।।२८।।

(इडायां पिङ्गलायां चन्द्रभास्करौ च चरतः। इडायां चन्द्रमा ज्ञेयः, पिङ्गलायां रविः स्मृतः।)

इडा और पिङ्गला में क्रमशः चन्द्र तत्व और सूर्य तत्व विचरण करते हैं। इड़ा में चन्द्र और पिङ्गला में सूर्य कहा गया है।

चन्द्रस्तासम इत्युक्तः सूर्यो राजस उच्यते[६२] ।
तावेव सकलं धत्तः कालं रात्रिन्दिवात्मकम्[६३] ।।२९।।

(चन्द्रः तामस इति उक्तः सूर्यः राजस उच्यते । तौ एव रात्रिं-दिवात्मकम् सकलं कालं धत्तः ।)

चन्द्र तामस कहा जाता है और सूर्य राजस कहा जाता है और वही दोनों रात-दिन रूप से सम्पूर्ण काल (समय) के नियामक हैं ।

भोक्त्री सुषुम्णा कालस्य गुह्यमेतदुदाहृतम् ।।३०।।

(सुषुम्णा कालस्य भोक्तृ इति एतत् गुह्यं उदाहृतम् ।)

उसमें गुप्त बात यह है कि सुषुम्णा काल का भक्षण करने वाली है ।

टिप्पणी - कुम्भक के अभ्यास के समय अन्तःस्थित प्राणवायु सुषुम्णा में प्रविष्ट होकर वहीं विद्यमान रहती है । उस विशिष्ट काल को, जिसमें प्राणवायु वहाँ रहती है, सुषुम्णा निगल जाती है अर्थात् ऐसे साधक पर उस क्षण समय का प्रभाव नहीं पड़ता। इसलिए सुषुम्णा को काल की भोक्तृ कहा गया है ।

सरस्वती कुहूश्चैव सुषुम्णापार्श्वयोः स्थिता[६४] ।
गान्धारी हस्तिजिह्वा च इडायाः पृष्ठपूर्वयोः[६५] ।
पूषा यशस्विनी चैव पिङ्गलापृष्ठपूर्वयोः[६६] ।।३१।।

सरस्वती कुहूः च एव सुषुम्णा (या) पार्श्वयोः स्थिता इडायाः पृष्ठपूर्वयोः गान्धारी हस्तिजिह्वा च पिङ्गलापृष्ठपूर्वयोः पूषा यशस्विनी च एव ।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सरस्वती और कुहू (नाड़ियाँ) सुषुम्णा के दोनों बगल में रहती हैं। गान्धारी और हस्तिजिह्वा इडा के पीछे और आगे हैं। पूषा और यशस्विनी पिङ्गला के पीछे और आगे हैं।

कुह्वाश्च हस्तिजिह्वाया मध्ये विश्वोदरा स्थिता[६७] ।
यशस्विन्याः कुहोर्मध्ये वरणा च प्रतिष्ठिता[६८] ।।३२।।

(कुह्वाः हस्तिजिह्वायाः च मध्ये विश्वोदरा स्थिता, यशस्विन्याः कुहोः मध्ये च वरणा प्रतिष्ठिता ।)

कुहू और हस्तिजिह्वा के बीच में विश्वोदरा स्थित है । यशस्विनी और कुहू के बीच में वरणा स्थित है ।

पूषायाश्च सरस्वत्याः स्थिता मध्ये पयस्विनी[६९] ।
गान्धारायाः सरस्वत्याः स्थिता मध्ये च शङ्खिनी[७०] ।।३३।।

(पूषायाः सरस्वत्याः च मध्ये पयस्विनी स्थिता, गान्धारायाः सरस्वत्याः मध्ये च शङ्खिनी स्थिता ।)

पूषा और सरस्वती के बीच में पयस्विनी स्थित है और गान्धारी तथा सरस्वती के बीच में शङ्खिनी स्थित है ।

अलम्बुषा च विप्रेन्द्र कन्दमध्यादधः स्थिता[७१] ।
पूर्वभागे सुषुम्णायास्त्वामेढ्रान्तं कुहूः स्थिता[७२] ।।३४।।

(विप्रेन्द्र, अलम्बुषा च कन्दमध्यात् अधः स्थिता, सुषुम्नायाः पूर्वभागे आमेढ्रान्तं कुहूः स्थिता ।)

हे विप्रश्रेष्ठ, अलम्बुषा कन्दमध्य के नीचे स्थित है। सुषुम्णा के पूर्वभाग में लिङ्गपर्यन्त कुहू नाड़ी जाती है ।

अधश्चोर्ध्वं च विज्ञेया वारणा सर्वगामिनी[७३] ।
यशस्विनी च याम्यस्य पादाङ्गुष्ठान्तमिष्यते[७४] ।।३५।।

(वारणा (याम्यस्य) अधः च ऊर्ध्वं च सर्वगामिनी विज्ञेया, यशस्विनी च पाद-अङ्गुष्ठ-अन्तं इष्यते ।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वारणा नाड़ी (शरीर में) नीचे और ऊपर तथा (दाएँ भाग में) सभी ओर फैली रहती है। यशस्विनी दाहिने भाग में पाँव के अँगूठे तक फैली हुई है।

पिङ्गला चोर्ध्वगा याम्ये नासान्तं विद्धि पुत्रक[७५] ।
याम्ये पूषा च नेत्रान्तं पिङ्गलायास्तु पृष्ठतः[७६] ।।३६।।

(पुत्रक! याम्ये नासान्तं ऊर्ध्वगा च पिङ्गला विद्धि। याम्ये च पिङ्गलायाः पृष्ठतः नेत्रान्तं तु पूषा ।)

हे पुत्र, दाहिने भाग में ऊपर की ओर नासिका तक जाने वाली जो नाड़ी है उसे पिङ्गला कहते हैं और उसी दाएँ भाग में पिङ्गला के पीछे की ओर से नेत्र तक जानेवाली नाड़ी को पूषा कहते हैं ।

पयस्विनी च विप्रेन्द्र याम्ये कर्णान्तमिष्यते[७७] ।
सरस्वती तथा चोर्ध्वमाजिह्वायाः प्रतिष्ठिता[७८] ।।३७।।

(विप्रेन्द्र! याम्ये कर्णान्तं पयस्विनी च इष्यते तथा ऊर्ध्वं आजिह्वायाः सरस्वती प्रतिष्ठिता ।)

हे विप्रश्रेष्ठ, उसी दाहिने भाग में कान तक जानेवाली जो नाड़ी है उसे पयस्विनी तथा ऊपर में जिह्वा तक जानेवाली नाड़ी को सरस्वती कहते हैं ।

आसव्यकर्णाद्विप्रर्षे शङ्खिनी चोर्ध्वमागता[७९] ।
गान्धारी सव्यनेत्रान्तमिडायाः पृष्ठतः स्थिता[८०] ।।३८।।

(विप्रर्षे! ऊर्ध्वं आसव्यकर्णात् आगता च शङ्खिनी, सव्यनेत्रान्तं इडायाः पृष्ठतः गान्धारी स्थिता ।)

हे विप्रश्रेष्ठ, ऊपर की ओर बाएँ कान तक आने वाली नाड़ी शङ्खिनी तथा इड़ा के पीछे से जाने वाली नाड़ी गान्धारी है, जो बाएँ आँख तक जाती है ।

इडा तु सव्यनासान्तं पिङ्गला दक्षिणे मता[८१] ।
सव्यभागे जया ज्ञेया पूषा चापि व्यवस्थिता[८२] ।
हस्तिजिह्वा तथा सव्यपादाङ्गुष्ठान्तमिष्यते[८३] ।।३९।।

(सव्यनासान्तं तु इडा, दक्षिणे पिङ्गला मता, सव्यभागे जया पूषा च अपि व्यवस्थिता इति ज्ञेया, तथा सव्य-पाद-अङ्गुष्ठान्तं हस्तिजिह्वा इष्यते ।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बाँयी नासिका तक इडा और दाएँ भाग तक पिङ्गला कही गई है। बाएँ भाग में जया और पूषा दोनों स्थित हैं ऐसा जानना चाहिए और बाएँ भाग में ही बाएँ पाँव के अंगूठे के अंत तक जानेवाली नाड़ी को हस्तिजिह्वा कहते हैं।

विश्वोदरा तु या नाडी सव्ये सर्वगता स्मृता[८४] ।
अलम्बुषा वामभागे पायुमूलादधोगता[८५] ।।४०।।

(सव्ये सर्वगता या नाडी तु विश्वोदरा स्मृता, पायुमूलात् अधोगता वामभागे अलम्बुषा।)

बाएँ भाग में फैली हुई नाड़ी विश्वोदरा कही गई है, गुदा मूल से नीचे तक बाएँ भाग में अलम्बुषा है।

एतास्वन्याः समुत्पन्ना नाड्योऽन्याश्च तास्वपि[८६] ।
यथाऽश्वत्थदले तद्वद्विज्ञेयाः सर्वनाडिषु[८७] ।।४१।।

(एतासु अन्याः समुत्पन्नाः, तासु अपि अन्याः च, यथा अश्वत्थदले, तद्वत् सर्वनाडिषु विज्ञेयाः।)

इनसे अन्य नाड़ियों की उत्पत्ति होती है तथा उनमें से और भी बहुतसी नाडियाँ निकलती है। जिस प्रकार पीपल के पत्ते में (शिरायें एवं उपशिराएँ) होती हैं उसी प्रकार सभी नाडियों के विषय में समझना चाहिए ।

टिप्पणी - इस श्लोक में अश्वत्थदल इस उपमा का व्यवहार किया गया है। हमारे विचार से दल के स्थान पर मूल शब्द का प्रयोग अधिक उचित और सार्थक होता, क्योंकि कन्दमूल से ही सभी नाडियाँ निकलकर पूरे शरीर में उसी प्रकार फैली हुई रहती है जैसे कि अश्वत्थ का मूल फैल कर बहुत बड़े क्षेत्र को घेर लेता है ।

प्राणो ऽपानः समानश्च उदानो व्यान एव च[८८] ।
नागः कूर्मः कृकरको देवदत्तो धनंजयः[८९] ।।४२।।

(प्राणः अपानः समानः च उदानः व्यानः एव च नागः कूर्मः कृकरकः देवदत्तः धनंजयः।)

प्राण, अपान, समान, उदान, व्यान, नाग, कूर्म, कृकरक, देवदत्त और धनंजय -

एते नाडिषु सर्वासु चरन्ति दश वायवः[९०] ।
एतेषु वायवः पञ्च मुख्याः प्राणादयः स्मृताः[९१] ।।४३।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(एते दश वायवः सर्वासु नाडिषु चरन्ति एतेषु प्राणादयः पञ्च वायवः मुख्याः स्मृताः।)

ये दस वायु सभी नाड़ियों में संचरण करते रहते हैं। इनमें प्राण आदि पाँच वायु मुख्य कहे गए हैं ।

तेषु मुख्यतमः प्राणः कन्दस्याधः प्रतिष्ठितः[९२] ।
चरत्यास्ये नासिकयोर्हृदये नाभिमण्डले[९३] ।
पादाङ्गुष्ठेऽपि स प्राण एतेष्वपि च तिष्ठति[९४] ।।४४।।

(तेषु मुख्यतमः प्राणः कन्दस्य अधः प्रतिष्ठितः, आस्ये नासिकयोः हृदये नाभिमण्डले चरति, एतेषु पादाङ्गुष्ठे अपि च स प्राणः तिष्ठति ।)

उनमें भी कन्द के नीचे भाग में विद्यमान रहते हुए मुख्यतम प्राण, मुख, नासिका, हृदय और नाभिमंडल तक संचरण करता रहता है । वह प्राण उपर्युक्त सभी स्थानों में और पाँव के अंगूठे तक भी रहता है ।

अपानो मेढ्रपायोश्च ऊरुवृषणजानुषु[९५] ।
जङ्घोदरे च कट्यां च नाभिमूले च तिष्ठति[९६] ।।४५।।

(अपानः मेढ्र-पायोः, ऊरू-वृषण-जानुषु, जङ्घा-उदरे च कट्यां च नाभिमूले च तिष्ठति ।)

अपानवायु लिङ्ग, गुदा, ऊरू, अंडकोष, जानु, जंघा, पेट, कटि और नाभिमूल में रहता है ।

व्यानः श्रोत्राक्षिमध्ये तु कृकाट्यां गुल्फयोरपि[९७] ।
घ्राणे गलेऽक्षिदेशे च स्थानेष्वेतेषु तिष्ठति[९८] ।।४६।।

(व्यानः श्रोत्र-अक्षिमध्ये कृकाटयां तु गुल्फयोः अपि घ्राणे, गले अक्षिदेशे च एतेषु स्थानेषु तिष्ठति ।)

व्यानवायु कान और आंख के मध्य में, ग्रीवास्थि में, दोनों टखनों में, नाक में, गर्दन में तथा आँख में, इतने स्थानों पर रहता है।

उदानः सर्वसंधिस्थः पादयोर्हस्तयोरपि[९९] ।।४७।।

(उदानः सर्वसन्धिस्थः पादयोः हस्तयोः अपि (तिष्ठति) ।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उदानवायु सभी सन्धिस्थानों (जोड़ों) में पांवों में और हाथों में भी रहता है ।

समानः सर्वदा देहे सर्वं व्याप्य व्यवस्थितः[१००] ।
भुक्तं सर्वरसं गात्रे व्यापयेद्वह्निना सह[१०१] ।।४८।।

(समानः देहे सर्वदा सर्वं व्याप्त व्यवस्थितः (तथा च) वह्निना सह भुक्तं सर्वरसं गात्रे व्यापयेत् ।)

समानवायु सदा देह में व्यवस्थित रूप से व्याप्त रहा करता है और जठराग्नि के साथ खाए गए सभी अन्नरस को अंगों में व्याप्त अर्थात् पहुँचाने का काम करता रहता है ।

द्विसप्ततिसहस्रेषु नाडीमार्गेषु सञ्चरन्[१०२] ।
समानवायुरेवैको देहं व्याप्य व्यवस्थितः[१०३] ।।४९।।

(द्विसप्ततिसहस्रेषु नाडीमार्गेषु एक एव समान वायुः सञ्चरन् देहं व्याप्य व्यवस्थितः)

बहत्तर हजार नाड़ी मार्गों में सञ्चरण करता हुआ यह एकमात्र समान वायु ही पूर्ण शरीर को व्याप्त करके स्थित है ।

नागादिवायवः पञ्च त्वगस्थ्यादिषु संस्थिताः[१०४] ।।५०।।

(नाग आदि पञ्च वायवः त्वक्-अस्थि-आदिषु संस्थिताः ।)

नागादि पाँच-वायु त्वचा, अस्थि आदि में रहा करते हैं ।

निःश्वासोच्छ्वासकासादि प्राणकर्म इतीष्यते[१०५] ।
अपानवायोः कर्मैतद्विण्मूत्रादिविसर्जनम्[१०६] ।
हानोपादानचेष्टादिर्व्यानकर्मेति कीर्त्यते[१०७] ।।५१।।

(निःश्वास-उच्छ्वास-कास आदि प्राणकर्म इति इष्यते । अपान वायोः विट्-मूत्र आदि विसर्जनं एतत् कर्म हान उपादान चेष्टा आदि व्यान कर्म इति कीर्त्यते ।)

श्वास-प्रश्वास कास (खाँसना) आदि प्राण की क्रिया कही जाती है । अपान वायु की क्रिया मलमूत्रादि विसर्जन है, और छोड़ना, लेना चेष्टादि कर्म व्यान वायु की क्रिया कही गई है ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उदानकर्म तत्प्रोक्तं देहस्योन्नयनादि यत्[१०८] ।
पोषणादि समानस्य शरीरे कर्म कीर्तितम्[१०९] ।।५२।।

(यत् देहस्य उन्नयनादि तत् उदानकर्म प्रोक्तम्, शरीरे पोषण आदि कर्म समानस्य कीर्तितम् ।)

शरीर का उत्थान आदि उदान वायु की क्रिया है और शरीर का पोषण करना समान वायु की क्रिया कही गई है ।

उद्‌गारादि गुणो यस्तु नागकर्मेति कीर्त्यते[११०] ।
निमीलनादि कूर्मस्य क्षुतं तु कृकरस्य च[१११] ।।५३।।

(यः उद्‌गार आदि गुणः नागकर्म इति कीर्त्यते निमीलन आदि कूर्मस्य, कृकरस्य तु क्षुतं च ।)

डकार आदि लेना नागवायु की क्रिया कही गई है, पलक झपकाने आदि की क्रिया कूर्मवायु की और छींकने की क्रिया कृकर वायु की है ।

देवदत्तस्य विप्रेन्द्र तन्द्रीकर्मेति कीर्त्यते[११२] ।
धनञ्जयस्य शोषादि सर्वकर्म प्रकीर्तितम्[११३] ।।५४।।

(विप्रेन्द्र, देवदत्तस्य तन्द्री कर्म इति कीर्त्यते, धनञ्जयस्य शोष आदि (एवं) सर्वकर्म प्रकीर्तितम् ।)

हे विप्रश्रेष्ठ, देवदत्त वायु की क्रिया तन्द्रा (जम्हाई लेना) है, तथा धनञ्जय वायु की शुष्कता आदि, इस प्रकार सभी (वायुओं) की क्रियाएँ कही गई हैं ।

ज्ञात्वैवं नाडिसंस्थानं वायुस्थानं प्रयत्नतः[११४] ।
नाडीसंशोधनं कुर्याद्यथाविधिपुरस्सरम्[११५] ।।५५।।

(एवं प्रयत्नतः नाडिसंस्थानं वायुस्थानं च ज्ञात्वा, यथाविधि पुरस्सरं नाडीसंशोधनं कुर्यात् ।)

इस प्रकार यत्नपूर्वक नाड़ियों के स्थानों तथा वायुओं के स्थानों को समझकर विधिपूर्वक नाडियों का शोधन करना चाहिए ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विध्युक्तकर्मसंयुक्तः सर्वकामविवर्जितः[११६] ।
यमादिगुणसंयुक्तः सर्वसङ्गविवर्जितः[११७] ।।५६।।

(विधि-उक्त-कर्म-संयुक्तः सर्वकामविवर्जितः यमादि गुण संयुक्तः सर्वसङ्गविवर्जितः (सन्) ।)

इस प्रकार शास्त्रोक्त (नित्य) कर्म करते हुए, सभी कामनाओं से रहित होकर, यम-नियम आदि गुणों से पूर्ण होकर, सभी प्रकार से संगों को छोड़कर -

तपोवनं ततो गत्वा फलमूलोदकान्वितम्[११८] ।
तत्र रम्ये शुचौ देशे नद्यां देवालयेऽपि वा[११९] ।।५७।।

(ततः फल-मूल-उदक-अन्वितं तपोवनं गत्वा तत्र रम्ये शुचौ देशे नद्यां देवालये अपि वा -)

तब फल, मूल, जल आदि से भरे तपोवन में जाकर वहाँ मनोरम तथा पवित्र स्थान में, नदी किनारे अथवा देवालय में -

सुशोभनं मठं कृत्वा सर्वरक्षासमन्वितम्[१२०] ।
त्रिकालस्नानसंयुक्तः शुचिर्भूत्वा समाहितः[१२१] ।।५८।।

(सर्वरक्षासमन्वितं सुशोभनं मठं कृत्वा त्रिकालस्नान-संयुक्तः शुचिः भूत्वा समाहितः (सन्))-

सभी प्रकार से सुरक्षित सुन्दर मठ बनाकर, त्रिकाल स्नान करते हुए पवित्र होकर, स्थिर चित्त हो -

मन्त्रन्यस्ततनुर्धीरः सितभस्मधरः सदा[१२२] ।
मृद्वासनोपरि कुशान् समास्तीर्याथवाजिनम्[१२३] ।।५९।।

(मन्त्रन्यस्त-तनुः धीरः सदा सितभस्मधरः मृदु-आसन-उपरि कुशान् अजिनं वा समास्तीर्य-)

मंत्रों की न्यास विधि से शरीर को स्थिर कर, सदैव शुभ्र भस्म लगाकर, कोमल आसन पर कुशों को अथवा मृगचर्म को बिछाकर -

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विनायकं सुसंपूज्य फलमूलोदकादिभिः[१२४] ।
इष्टदेवं गुरुं नत्वा तत्र प्रारभ्य चासनम्[१२५] ।।६०।।

(फल-मूल-उदक-आदिभिः विनायकं सुसम्पूज्य, इष्टदेवं गुरुं (च) नत्वा तत्र आसनं च प्रारभ्य ।)

फल, मूल, जल आदि से विघ्ननिवारक गणपति की अच्छी प्रकार पूजा कर, इष्टदेव और गुरु को प्रणाम कर, वहाँ आसन प्रारम्भ करना चाहिए ।

प्राङ्मुखोदङ्मुखो वा स्यात् पद्मासनगतः स्वयम्[१२६] ।
समग्रीवशिरःकायः संवृतास्यः सुनिश्चलः[१२७] ।।६१।।

(स्वयं प्राङ्मुखः उदङ्मुखः वा पद्मासनगतः समग्रीवशिरः कायः संवृत-आस्यः सुनिश्चलः स्यात् ।)

स्वयं पूर्वाभिमुख अथवा उत्तराभिमुख हो पद्मासन लगाकर गर्दन, सिर और पूरे शरीर को समान अवस्था में रखकर मुख बंद कर सुस्थिर होकर बैठें ।

नासायां तु सदा सम्यक् न्यस्य सव्येतरं करम्[१२८] ।
नासाग्रे शशभृद्बिम्बं ज्योत्स्नाजालवितानितम्[१२९] ।।६२।।

(सव्य-इतरं करं तु सदा नासायां सम्यक् न्यस्य, नासाग्रे ज्योत्स्ना-जाल-वितानितं शशभृत् बिम्बम् -)

दाहिने हाथ को सदैव नासापुट में लगाकर नासाग्र भाग पर ज्योत्स्ना-जाल से भरे चन्द्रबिम्ब की कल्पना कर -

सप्तमस्य तु वर्गस्य चतुर्थं बिन्दुसंयुतम्[१३०] ।
बिन्दुमध्यस्थमालोक्य नेत्राभ्यां मनसा सह[१३१] ।।६३।।

(सप्तमस्य तु वर्गस्य चतुर्थं तु बिन्दु संयुतं (कृत्वा) मनसा सह नेत्राभ्यां बिन्दुमध्यस्थं आलोक्य -)

सप्तम (य,र,ल,व) वर्ग के चौथे व को अनुस्वारयुक्त (वं) कर, मनोयुक्त (आन्तरिक) नेत्रों से बिन्दु के बीच में देखते हुए -

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इडया पूरयेद्वायुं बाह्याद् द्वादशमात्रकैः[१३२] ।
ततोऽग्निं पूर्ववद्ध्यायेत् स्फुरज्ज्वालावलीयुतम्[१३३] ।।६४।।

(इडया बाह्याद् वायुं द्वादशमात्रकैः पूरयेत् ततः स्फुरत् ज्वालावलीयुतं अग्निं पूर्ववत् (मनसा सह) ध्यायेत्।)

इडा (बायीं) नाड़ी के द्वारा बाहरी वायु का बारह मात्राओं से पूरण करना चाहिए, उसके बाद ज्वालाओं से युक्त अग्नि का ध्यान पूर्ववत् ही करना चाहिए।

रेफं च बिन्दुसंयुक्तमग्निमण्डलसंस्थितम्[१३४] ।
ध्यायन् विरेचयेत् पश्चान्मन्दं पिङ्गलया पुनः[१३५] ।।६५।।

(रेफं बिन्दुसंयुक्तं च अग्निमण्डलसंस्थितं पुनः ध्यायन् पश्चात् पिङ्गलया मन्दं विरेचयेत् ।)

र को बिन्दु से युक्त कर (रं) अग्निमण्डल के बीच में चिंतन करते-करते फिर पिङ्गला के द्वारा धीरे-धीरे रेचक करना चाहिए ।

पुनः पिङ्गलयापूर्य प्राणं दक्षिणतः सुधीः[१३६] ।
ततो विरेचयेद्धीमानिडया तु शनैः शनैः[१३७] ।।६६।।

(पुनः दक्षिणतः पिङ्गलया प्राणं आपूर्य सुधीः ततः शनैः शनैः धीमान् तु इडया विरेचयेत् ।)

फिर दाहिनी नाड़ी पिङ्गला के द्वारा प्राण का पूरण करके बुद्धिमान योगियों को तब इड़ा नाड़ी के द्वारा धीरे-धीरे रेचन करना चाहिए ।

त्रिचतुर्वत्सरं चाथ त्रिचतुर्मासमेव वा[१३८] ।
षट्त्रिंशदाचरेदेवं त्रिषु कालेषु यत्नतः[१३९] ।।६७।।

(त्रिचतुः वत्सरं अथ च त्रिचतुः मासम् एव वा त्रिषु कालेषु षट्त्रिंशद् यत्नतः एवं आचरेत् ।)

तीन चार वर्ष अथवा तीन चार महीने तक इस प्रकार प्रति दिन त्रिकाल छतीस बार यत्नपूर्वक अभ्यास करना चाहिए ।

नाडीशुद्धिमवाप्नोति पृथक् चिह्नोपलक्षिताम्[१४०] ।
शरीरलघुता दीप्तिर्जठराग्निविवर्धनम्[१४१] ।।६८।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नादाभिव्यक्तिरित्येतच्चिह्नं तच्छुद्धिसूचकम्[१४२] ।
यावदेतानि सम्पश्येत्तावदेवं समाचरेत्[१४३] ।।६९।।

(पृथक् चिह्न उपलक्षितां नाडीशुद्धिम् अवाप्नोति (यथा)-शरीर-लघुता, दीप्तिः, जठराग्निविवर्धनं, नाद-अभिव्यक्तिः इति एतत् चिह्नं तत् शुद्धिसूचकम् यावत् एतानि सम्पश्येत् तावत् एवं समाचरेत् ।)

इससे नाड़ीशुद्धि सूचक पृथक्-पृथक् चिह्न प्राप्त होते हैं, जैसे शरीर का हल्कापन, कान्ति, जठराग्नि का बढ़ना और नाद का आविर्भाव, ये सभी चिन्ह नाड़ीशुद्धि के सूचक हैं। ये सभी चिन्ह दिखाई देने तक इस प्रकार अभ्यास करते रहना चाहिए ।

✱ इति वसिष्ठसंहितायां योगकाण्डे द्वितीयोऽध्यायः ।।

इस प्रकार वसिष्ठसंहिता योगकाण्ड का
द्वितीय अध्याय समाप्त हुआ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तृतीयोऽध्यायः

वसिष्ठ उवाच[१] **-**

प्राणायाममथेदानीं वक्ष्यामि प्रणवात्मकम्[२]**।**
समाहितमना भूत्वा शृणु पुत्रक सुव्रत[३] **।।१।।**

(अथ इदानीं प्रणवात्मकं प्राणायामं वक्ष्यामि, सुव्रत पुत्रक समाहितमना भूत्वा शृणु ।)

वसिष्ठ बोले, अब मैं ओंकारयुक्त प्राणायाम का वर्णन करता हूँ । हे निष्ठावान् पुत्र, एकाग्रचित्त होकर सुनो ।

प्राणापानसमायोगः प्राणायामः प्रकीर्तितः[४]**।**
प्राणायामस्त्रिभिः प्रोक्तो रेचपूरककुम्भकैः[५]**।।२।।**

(प्राण अपान समायोगः प्राणायामः प्रकीर्तितः रेच-पूरक-कुम्भकैः त्रिभिः प्राणायामः प्रोक्तः ।)

प्राण और अपान का उचित संयोग प्राणायाम कहा जाता है । रेचक -पूरक-कुम्भक इन तीनों से प्राणायाम बनता है ।

वर्णत्रयात्मका ह्येते रेचपूरककुम्भकाः[६] **।**
स एष प्रणवः प्रोक्तः प्राणायामश्च तन्मयः[७] **।।३।।**

(एते रेचक-पूरक-कुम्भकाः हि वर्णत्रयात्मकाः स एष प्रणवः प्रोक्तः प्राणायामः च तन्मयः ।)

ये रेचक, पूरक और कुम्भक क्रमशः तीन अक्षरों से युक्त होते हैं। वही तीन अक्षर ओंकार कहा जाता है और प्राणायाम उस से अभिन्न है ।

(टिप्पणी - अ, उ, म ये वर्णत्रय के नाम से जाने जाते हैं । ये ही तीन वर्ण सम्पूर्ण देवनागरी लिपि के प्रतिनिधि हैं। अ इस लिपि का पहला वर्ण है जबकि म उस लिपिसमूह का अन्तिम । उ देवनागरी लिपि में पहले विकार का सूचक है ।)

यो वेदादौ स्वरः प्रोक्तो वेदान्तेषु प्रतिष्ठितः[८] **।**
सृष्टिस्थित्यात्मकावेतौ मकारोन्त्योन्तकः स्मृतः[९] **।।४।।**

(यः वेद आदौ स्वरः प्रोक्तः वेदान्तेषु प्रतिष्ठितः एतौ (अ, उ) स्थिति आत्मकौ, अन्त्यः मकारः अन्तकः स्मृतः ।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जिसको वेदादि में स्वर कहा गया है, उपनिषदों में जो आधारभूत है वही अ और उ क्रमशः सर्जन और धारण करने वाला तथा अन्तिम मकार उपसंहार (लय) करने वाला कहा गया है ।

(**टिप्पणी -** यहाँ अ और उ क्रमशः पूरक एवं कुम्भक तथा म रेचक के लिए प्रयुक्त हुआ है।)

अकारमूर्तिरेतेषां रक्ताङ्गी हंसवाहिनी[१०] ।
दण्डहस्ता सती बाला गायत्रीत्यभिधीयते[११] ।।५।।

(एतेषां अकारमूर्तिः रक्ताङ्गी हंसवाहिनी दण्डहस्ता सती बाला गायत्री इति अभिधीयते ।)

इनमें अकार स्वरूप वाली लालवर्ण वाली, हंसवाहिनी गायत्री नाम से कही जाती है जो हाथ में दण्ड धारण किए हुए, बाला (सोलह वर्ष) की सती है ।

उकारमूर्तिस्त्वत्रस्था युवती शुक्लविग्रहा[१२] ।
गरुत्मद्वाहिनी चापि देवताचक्रधारिणी[१३] ।।६।।

(अत्रस्था तु उकारमूर्तिः शुक्लविग्रहा च गरुत्मद्वाहिनी अपि युवती चक्रधारिणी देवता ।)

और इनमें उकार स्वरूप वाली शुक्लवर्णांगी, गरुड़वाहिनी युवती (तीस वर्षीया) चक्रधारिणी देवता है ।

मकारमूर्तिः शुक्लाङ्गी सावित्री च त्रिलोचना ।
सरस्वती शूलहस्ता वृद्धा वृषभवाहिनी[१४] ।
माहेश्वरी तु सा प्रोक्ता पश्चिमा च प्रकीर्तिता[१५] ।।७।।

(मकारमूर्तिः त्रिलोचना शुक्लाङ्गी शूलहस्ता वृषभवाहिनी वृद्धा च सावित्री प्रोक्ता । सा तु सरस्वती माहेश्वरी पश्चिमा च प्रकीर्तिता ।)

मकार स्वरूप वाली, त्रिलोचना, शुक्लाङ्गी, शूलहस्ता, वृषभवाहिनी, वृद्धा (पचास से ऊपर की) सावित्री देवी कही गईं हैं । और ये सरस्वती, माहेश्वरी, पश्चिमा नाम से भी जानी जाती हैं ।

अक्षरत्रयमेतद्धि कारणत्रयमिष्यते[१६] ।
त्रयाणां कारणं ब्रह्म भारूपं सर्वकारणम्[१७] ।।८।।

(एतत् अक्षरत्रयं हि कारणत्रयं इष्यते । त्रयाणां कारणं (हि) भारूपं ब्रह्मं सर्वकारणम् ।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ये तीनों अक्षर ही तीन कारण कहे गए हैं और इन तीनों के मूल कारण आभास्वरूप ब्रह्म हैं जो सभी के कारण हैं ।

एकाक्षरं परं ज्योतिस्तदाहुः प्रणवं बुधाः[१८] ।
एवं ज्ञात्वा विधानेन प्रणवेन समन्वितम्[१९] ।
प्राणायामं त्रिभिः कुर्याद्रेचपूरककुम्भकैः[२०] ।।९।।

(बुधाः तत् प्रणवं एकाक्षरं परं ज्योतिः आहुः एवं ज्ञात्वा प्रणवेन समन्वितं प्राणायामं विधानेन रेच-पूरक-कुम्भकैः त्रिभिः कुर्यात् ।)

विद्वान् लोग उस प्रणव (ओंकार) को एकाक्षर प्रणव ज्योति कहते हैं । ऐसा समझकर ओंकारयुक्त रेचक, पूरक, कुम्भक इन तीनों से विधिपूर्वक प्राणायाम करना चाहिए ।

आकृष्य श्वसनं बाह्यात्पूरयेदिडयोदरम्[२१] ।
शनैः षोडशभिर्मात्रैरकारं संस्मरन् बुधः[२२] ।।१०।।

(षोडशभिः मात्रैः शनैः इडया अकारं संस्मरन् बाह्यात् श्वसनम् आकृष्य बुधैः उदरं पूरयेत् ।)

सोलह मात्राओं तक धीरे-धीरे इड़ा नाड़ी द्वारा अकार का स्मरण करते हुए बाहर से वायु को खींचकर विद्वान लोग उदर को पूरित करें ।

धारयेत् पूरितं पश्चात् चतुःषष्ठ्या तु मात्रया[२३] ।
उकारमूर्तिमत्रापि संस्मरन् प्रणवं जपेत्[२४] ।
यावद्वा शक्यते तावद्धारणं जपसंयुतम्[२५] ।।११।।

(पश्चात् चतुःषष्ठ्या मात्रया तु पूरितं धारयेत् अत्र अपि उकारमूर्ति संस्मरन् प्रणवं जपेत् वा यावत् शक्यते तावत् जपसंयुतं धारणं (कुर्यात्) ।)

बाद में चौंसठ मात्रा से पूरित वायु का धारण (कुम्भक) करना चाहिए और वहाँ पर भी उकार स्वरूप का स्मरण करते हुए ओंकार का जप करना चाहिए अथवा इस प्रकार जब तक धारण (कुम्भक) कर सकें तब तक जपयुक्त धारण करना चाहिए ।

पूरितं रेचयेत् पश्चात् प्राणं बाह्यानिलान्वितम्[२६] ।
शनैः पिङ्गलया पुत्र द्वात्रिंशन्मात्रया पुनः[२७] ।।१२।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(पश्चात् पुत्र बाह्य अनिल-अन्वितं पूरितं प्राणं पुनः द्वात्रिंशत् मात्रया शनैः पिङ्गलया रेचयेत् ।)

बाद में हे पुत्र बाहरी वायुरूप पूरित प्राण को पुनः बत्तीस मात्रा से धीरे-धीरे पिङ्गला के द्वारा छोड़ना चाहिए ।

ध्यायन्नन्त्याक्षरं तत्र प्रणवस्य समाहितः[२८] ।
प्राणायामो भवेदेष पुनश्चैव समभ्यसेत्[२९] ।।१३।।

(तत्र समाहितः (सन्) प्रणवस्य अन्त्य अक्षरं ध्यायन्, एष प्राणायामः भवेत्, पुनः च एव समभ्यसेत्-)

वहाँ एकाग्रचित्त से ओंकार के अन्तिम अक्षर (म) का ध्यान करना चाहिए। यही प्राणायाम होता है। इसका पुनः-पुनः अभ्यास करें ।

ततः पिङ्गलयाऽऽपूर्य मात्रैः षोडशभिस्तथा[३०] ।
अकारमूर्तिमत्रापि संस्मरन् सुसमाहितः[३१] ।।१४।।

(ततः षोडशभिः मात्रैः पिङ्गला आपूर्य तथा अत्र अपि अकारमूर्तिं सुसमाहितः संस्मरन्-)

(तब सोलह मात्रा से पिङ्गला के द्वारा पूरित कर और यहा भी अकार स्वरूप का एकाग्रचित्त से स्मरण करते हुए -

पूरितं धारयेत् प्राणं पुनर्द्वात्रिंशतिद्वयम्[३२] ।
जपेत्तत्रस्मरेन्मूर्तिं उकाराख्यं समाहितः[३३] ।।१५।।

(पुनः द्वात्रिंशतिद्वयं पूरितं प्राणं धारयेत् । तत्र उकाराख्यं मूर्तिं स्मरन् समाहितः जपेत् ।)

पुनः चौंसठ मात्रा तक पूरित प्राण को धारण करना चाहिए । वहाँ उकार मूर्ति का स्मरण करते हुए एकाग्रचित्त से जप करना चाहिए ।

धारितं रेचयेत् पश्चात् प्राणं बाह्यानिलान्वितम्[३४] ।
यावद्वाशक्यते पश्चाद्रेचयेदिडयाऽऽनिलम्[३५] ।
मकारमूर्तिमत्रापि संस्मरन् पूर्ववद्बुधः[३६] ।।१६।।

(धारितं बाह्य-अनिल-अन्वितं प्राणं पश्चात् रेचयेत् यावत् वा शक्यते (धारयेत्) पश्चात् पूर्ववत् मकार-मूर्ति अत्र अपि संस्मरन् बुधः इडया अनिलं रेचयेत् ।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बाद में धारण किए हुए बाहरी वायु रूप प्राण को (इस प्रकार) छोडे, जब तक हो सके धारण करने के बाद पूर्ववत् मकार मूर्ति का यहाँ भी स्मरण करते हुए विद्वान साधक इड़ा के द्वारा वायु को छोड़े ।

तथैव च पुनः कुर्यादिडया पूर्वपूर्ववत्[३७] ।
नित्यमेवं प्रकुर्वीत प्राणायामांस्तु षोडश[३८] ।।१७।।

(तथैव पूर्व पूर्ववत् इडया पुनः च कुर्यात् । एवं तु नित्यं षोडश प्राणायामान् प्रकुर्वीत ।)

इस प्रकार पुनः पुनः इड़ा के द्वारा पूर्वोक्त रीति से प्रतिदिन सोलह प्राणायाम करना चाहिए ।

अपि भ्रूणहनं मासात् पुनन्त्यहरहः कृताः[३९] ।
प्राणायामपराः सर्वे प्राणायामपरायणाः ।।१८।।

(प्राणायामपरायणाः सर्वे प्राणायामपराः अहः अहः कृताः (साधकाः) मासात् भ्रूणहनं अपि पुनन्ति ।)

प्राणायाम को ही सर्वस्व समझकर प्राणायाम का अभ्यास प्रतिदिन करने वाले सभी साधक एक मास में भ्रूणहत्या जैसे पाप से मुक्त हो जाते हैं ।

प्राणायामैर्विशुद्धा ये ते यान्ति परमां गतिम्।
प्राणायामादृते नान्यत्तारणं नरकादपि[४०] ।।१९।।

(ये प्राणायामैः विशुद्धा ते परमां गतिं यान्ति, नरकात्अपि तारणं प्राणायामात् ऋृते अन्यत् न ।)

जो प्राणायाम से पवित्र हो जाते हैं वे परमगति को प्राप्त होते हैं। नरक से भी मुक्त करनेवाला प्राणायाम के सिवा दूसरा कुछ भी नहीं है ।

संसारार्णवमग्नानां तारकः प्राणसंयमः।।२०।।

(संसार अर्णव मग्नानां प्राणसंयमः तारकः ।)
संसारसमुद्र में डूबे हुए के लिए प्राणायाम ही तारक है ।

बाह्यादापूरणं वायोरुदरे पूरकः स्मृतः[४१] ।
सम्पूर्णकुम्भवद्वायोर्धारणं कुम्भको भवेत्[४२] ।
बहिर्यद्रेचनं वायोरुदराद्रेचको हि सः[४३] ।।२१।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(उदरे बाह्यात् वायोः आपूरणं पूरकः स्मृतः सम्पूर्ण कुम्भवत् वायोः धारणं कुम्भकः भवेत्, वायोः उदरात् बहिः रेचनं सः हि रेचकः ।)

पेट को बाहर की वायु से पूरित करना पूरक कहा जाता है। भरे हुए कुम्भ के समान (पेट में) वायु को धारण करना कुम्भक होता है । पेट से वायु को बाहर निकालना ही रेचक है ।

प्रस्वेदजनको यस्तु प्राणायामेषु सोऽधमः[४४] ।
मध्यमः कम्पनात् प्रोक्त उत्थानं चोत्तमाद्भवेत्[४५] ।।२२।।

(प्राणायामेषु यः प्रस्वेदजनकः सः तु अधमः, कम्पनात् मध्यमः प्रोक्तः, उत्थानं च उत्तमात् भवेत् ।)

प्राणायाम में जो पसीना निकालने वाला होता है वह कनिष्ठ प्राणायाम, कम्प उत्पन्न करने वाला मध्यम प्राणायाम तथा शरीर को ऊपर उठने जैसा अनुभव दिलाने वाला उत्तम प्राणायाम होता है ।

(**टिप्पणी -** यहाँ अधम, मध्यम और उत्तम शब्द क्रमशः पहली, दूसरी एवं अंतिम अवस्था द्योतक है-जिसका क्रमिक अनुभव साधक को प्राणायाम के अभ्यास के समय होता है। जो प्राणायाम का अभ्यास करते हैं, उन्हें उपरोक्त सभी चिन्ह क्रमशः प्राप्त होते हैं । अतः इन्हें अधम (कनिष्ठ), मध्यम और उत्तम कहा गया है । यही बात आगे के श्लोक में अधिक स्पष्ट की गई है ।

पूर्वं पूर्वं प्रकुर्वीत यावदुत्तमसम्भवः[४६] ।
सम्भवत्युत्तमे पुत्र प्राणायामे सुखी भवेत्[४७] ।।२३।।

(यावत् उत्तम-संभव (तावत्) पूर्वं-पूर्वं प्रकुर्वीत। पुत्र, उत्तमे प्राणायामे संभवति (सति) सुखी भवेत् ।)

जब तक उत्तम प्राणायाम सिद्ध न हो तब तक कनिष्ठ और मध्यम का अभ्यास करते रहना चाहिए। हे पुत्र, उत्तम प्राणायाम सिद्ध हो जाने से योगी सुख प्राप्त करता है ।

प्राणो लयति तेनैव देहस्यान्तस्ततोऽधिकः[४८] ।
देहश्चोत्तिष्ठते तेन कृतासनपरिग्रहः[४९] ।।२४।।

(तेन एव देहस्य अन्तः प्राणः लयति । ततः अधिकः तेन कृत आसन परिग्रहः (सन् अपि) देहः उत्तिष्ठते ।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऐसा अभ्यास होने से देह के अन्दर प्राण का लय हो जाता है । उससे भी अधिक आसन बांध कर बैठने पर भी देह के उठने जैसा अनुभव होता है ।

निःश्वासोच्छ्वासकौ तस्य न विद्येते कथञ्चन।
देहे यद्यपि तौ स्यातां स्वाभाविकगुणावुभौ।।२५।।

तथापि नश्यतस्तेन प्राणायामोत्तमेन हि[५०] ।
तयोर्नाशे समर्थःस्यात् कर्तुं केवलकुम्भकम्[५१] ।।२६।।

(तस्य निःश्वास-उच्छ्वासकौ कथञ्चन न विद्येते यदि अपि देहे स्वभाविक गुणौ तौ उभौ स्याताम् तथा अपि उत्तमेन प्राणायामः हि तेन नश्यतः तयोः नाशे (साधकः) केवलकुम्भकं कर्त्तुं समर्थः स्यात् ।)

ऐसे साधक के श्वास-प्रश्वास कुछ भी नहीं रहते । यद्यपि शरीर में स्वाभाविक रूप से दोनों रहा करते हैं, परन्तु उत्तम प्राणायाम के कारण दोनों शान्त हो जाते हैं । उन दोनों के शान्त हो जाने से साधक केवल-कुम्भक करने में समर्थ होता है ।

रेचनं पूरणं मुक्त्वा सुखं यद्वायुधारणम्[५२] ।
प्राणायामोऽयमित्युक्तः स वै केवलकुम्भकः[५३] ।।२७।।

(रेचनं पूरणं मुक्त्वा सुखं यत् वायुधारणं स प्राणायामः केवलकुम्भकः इति उक्तः ।)

रेचन और पूरण के बिना सुखपूर्वक जो वायु का धारण होता है, वही प्राणायाम - केवलकुम्भक प्राणायाम कहा जाता है ।

विरेच्यापूर्य यं कुर्यात् स वै सहितकुम्भकः[५४] ।
सहितं केवलं चाथ कुम्भकं नित्यमभ्यसेत्[५५] ।।२८।।

(विरेच्य आपूर्य यं कुर्यात् स वै सहितकुम्भकः अथ सहितं केवलं च कुम्भकं नित्यम् अभ्यसेत् ।)

रेचक और फिर पूरक जो (कुम्भक) किया जाता है वही सहितकुम्भक है, अतः सहित और केवलकुम्भक का नित्य अभ्यास करना चाहिए ।

यावत् केवलसिद्धिः स्यात् तावत् सहितमभ्यसेत्[५६] ।।२९।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(यावत् केवलसिद्धिः स्यात् तावत् सहितं अभ्यसेत् ।)

जबतक केवलकुम्भक की प्राप्ति हो तब तक सहित का अभ्यास करना चाहिए ।

केवले कुम्भके सिद्धे रेचपूरणवर्जिते[५७] ।
न तस्य दुर्लभं किञ्चित् त्रिषु लोकेषु चात्मज[५८] ।
मनोजवत्वं लभते पलितादि विनश्यति[५९] ।।३०।।

(रेच-पूरण वर्जिते केवले कुम्भके सिद्धे (सति) आत्मज तस्य त्रिषु लोकेषु किञ्चित् दुर्लभं न । मनोजवत्वं लभते पलितादि विनश्यति ।)

रेचक पूरक के बिना जब केवलकुम्भक की प्राप्ति हो जाए, तब हे पुत्र, उसे तीनों लोकों में कुछ भी दुर्लभ नहीं रह जाता है । उसे मन की इच्छित तीव्रता मिलती है तथा बुढ़ापे के चिन्ह नष्ट हो जाते हैं ।

प्रोक्तस्तेयं महामार्गो मकाराख्योऽन्तकान्तकः[६०] ।
नादं चोत्पादयत्येष कुम्भकः प्राणसंयमः[६१] ।।३१।।

(ते अयं मकाराख्यः महामार्गः अन्तकान्तकः उक्तः एष प्राणसंयमः कुम्भकः नादं च उत्पादयति ।)

तुम्हें यह मकार नाम से, मृत्यु को दूर करने वाला, महामार्ग मैंने कहा। इस कुम्भक-प्राणायाम से नाद की उत्पत्ति होती है ।

प्राणसंयमनं नाम देहे प्राणादिधारणम्[६२] ।
एष प्राणजयोपायः सर्वमृत्यूपघातकः[६३] ।।३२।।

(देहे प्राण-आदि धारणं प्राणसंयमनं नाम । सर्व एष प्राण जय उपायः मृत्यु-उपघातकः ।)

शरीर में प्राण आदि का धारण करना प्राणनिरोध (प्राणायाम) कहलाता है। मृत्यु को सर्वथा दूर करने वाला यह प्राण को जय करने का उपाय है।

किञ्च प्राणजयोपायं तव वक्ष्यामि तत्त्वतः[६४] ।।३३।।

(किञ्च प्राण-जय-उपायं तत्त्वतः तव वक्ष्यामि ।)

इसके अतिरिक्त प्राण को वश में करने का और भी वास्तविक उपाय तुम्हें कहता हूँ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बाह्यात् प्राणं समाकृष्य पूरयित्वोदरस्थितम्[६५] ।
अङ्गुष्ठे नाभिनासाग्रे धारणाद्विजयिष्यते[६६] ।।३४।।

(बाह्यात् प्राणं समाकृष्य पूरयित्वा उदर स्थितं (च) अङ्गुष्ठे नाभि नासाग्रे धारणात् विजय-इष्यते ।)

बाहर से वायु को खींचते हुए पूरक-कर उदरस्थ (प्राणको) पांव के अंगूठे, नाभि और नासाग्र में उसका धारण करने से उसे वश में किया जा सकता है ।

एवं वायुजयोपायः शक्यमासनमास्थितः[६७] ।।३५।।

(आसनम् आस्थितः (एव) एवं वायुजय उपायः शक्यम् ।)

आसन लगाकर ही इस प्रकार से वायु को वश में करना सम्भव हो पाता है ।

करणानि वशीकृत्य विषयेभ्यो बलात् सुधीः[६८] ।
अपानमूर्ध्वमाकृष्य वायुमायुर्विघातकम्[६९] ।
वह्निस्थाने निरुध्येत वायुं तत्रैव धारयेत्[७०] ।।३६।।

(सुधीः करणानि विषयेभ्यो बलात् वशीकृत्य आयुः विघातकं अपानं वायुं ऊर्ध्वं आकृष्य वह्निस्थाने निरुध्येत (तथा च) तत्र एव वायुं धारयेत् ।)

योगी इन्द्रियों को विषयों से यत्नपूर्वक नियन्त्रित कर आयु के विघातक अपानवायु को, ऊपर की ओर खींचकर वह्निमण्डल में रोके और वहीं पर वायु को धारण करे ।

हस्ताभ्यां बन्धयेत् सम्यक्कर्णादिकरणानि च[७१] ।
अङ्गुष्ठाभ्यामुभे श्रोत्रे तर्जनीभ्यां च चक्षुषी[७२] ।।३७।।
नासापुटौ मध्यमाभ्यां यावच्छक्ति निरोधयेत्[७३] ।
अनेनोत्पद्यते नादः शुद्धस्फटिक सन्निभः[७४] ।।३८।।

(हस्ताभ्यां कर्णादि करणानि सम्यक् बन्धयेत् अङ्गुष्ठाभ्यां च उभे श्रोत्रे तर्जनीभ्यां च चक्षुषी मध्यमाभ्यां नासापुटौ च यावत् शक्तिः निरोधयेत् । अनेन स्फटिकसन्निभः शुद्धः नादः उत्पद्यते ।)

दोनों हाथों से कान आदि इन्द्रियों को बंद करें । दोनों अंगूठों से दोनों कान, दोनों तर्जनी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

से दोनों आँखें और दोनों मध्यमा से दोनों नासापुट को यथाशक्ति बंद करके रखें, इससे स्फटिक मणि के समान स्वच्छ नाद का आविर्भाव होता है ।

ब्रह्मरन्ध्रे सुषुम्णाया मृणालान्तरसूत्रवत्[७५] ।
आमूर्धो वर्तते नादो वीणादण्डवदुत्थितः[७६] ।।३९।।

(सुषुम्णायाः ब्रह्मरन्ध्रे मृणाल-अन्तर-सूत्रवत् वीणा दण्डवत् आमूर्धो उत्थितः नादः वर्तते ।)

सुषुम्ना के ब्रह्मद्वार में कमलनाल के मध्यतन्तु के सदृश वीणादण्ड के समान मस्तक तक उठा हुआ नाद है।

शङ्खध्वनिनिभश्चादौ मध्ये मेघध्वनिर्यथा[७७] ।
व्योमरंध्रगते वायौ मनसा च सहेन्द्रियैः[७८] ।
ब्रह्मरन्ध्रगते नादो गिरिप्रस्रवणस्तथा[७९] ।।४०।।

(आदौ शङ्खध्वनिनिभः मध्ये मेघध्वनिः च यथा इन्द्रियैः सह मनसा च वायौ व्योमरन्ध्रगते तथा ब्रह्मरन्ध्रगतः गिरिप्रस्रवण (वत्) नादः ।)

प्रारम्भ में शङ्खध्वनि के समान, मध्य में मेघध्वनि के समान, फिर इन्द्रियों के साथ मनोयुक्त वायु जब सुषुम्ना में प्रविष्ट होता है, तब ब्रह्मरन्ध्र में पहुँचकर पहाड़ से गिरते हुए झरने के समान वह नाद उत्पन्न होता है।

तदानन्दी भवेद्देही वायुस्तेन जितो भवेत्[८०] ।
योगिनस्त्वपरेह्यत्र वदन्ति समबुद्धयः[८१] ।।४१।।

(तदा तेन वायुः जितः भवेत् देही आनन्दी भवेत् अपरे समबुद्धयः योगिनः तु अत्र हि वदन्ति ।)

तब उससे वायु वश में आ जाता है और योगी आनन्द को प्राप्त करता है । कुछ दूसरे समबुद्धि योगी यहाँ ऐसा कहते हैं ।

प्राणायामपराः पूता रेचपूरकवर्जिताः[८२] ।
दक्षिणेतरगुल्फेन सीवनीं पिडयेच्छिराम्[८३] ।।४२।।

अधस्तादण्डयोः सूक्ष्मां सव्योपरि च दक्षिणम्[८४] ।
जङ्घोर्वोरन्तरे तत्र निश्छिद्रं बन्धयेद्दृढम्[८५] ।।४३।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(रेचपूरकवर्जिताः प्राणायामपराः पूताः दक्षिण-इतरगुल्फेन अण्डयोः अधस्तात् सीवनीं सूक्ष्मां शिरां पीडयेत् च सव्य उपरि दक्षिणं तत्र (स्थाप्य) जङ्घा-ऊरु अन्तरे दृढं निश्छिद्रं बन्धयेत् ।)

रेचक-पूरक के बिना प्राणायाम के अभ्यास से पवित्र होकर बाएँ टखने से अण्डकोश के नीचे सीवनी के सूक्ष्म नस को दबाकर रखें । अब बाएँ टखने के ऊपर दाहिने टखने को रखकर जांघ और उरु के बीच को दृढ़ता से सटाकर छिद्ररहित आसन बांधें।

(**टिप्पणी-** यहाँ पर वसिष्ठ ने आसन करने की विधिमात्र बताई है, परन्तु उसका कोई विशेष नामोल्लेख यहाँ पर नहीं किया है । इसी पुस्तक के प्रथम अध्याय के ६६ वें और ६७ वें श्लोक से पता चलता है कि यह स्वस्तिक आसन से भिन्न नहीं है ।)

समग्रीवशिरः स्कन्धः समपृष्ठः समोदरः[८६] **।**
नेत्राभ्यां दक्षिणं गुल्फं लोकयेदुपरिस्थितम्[८७] **।।४४।।**

(सम-ग्रीवः-शिरः-स्कन्धः समपृष्ठः सम-उदरः नेत्राभ्यां उपरि स्थितं दक्षिणं गुल्फं लोकयेत् ।)

गर्दन, मस्तक, स्कन्ध, पीठ और पेट को सीधी अवस्था में रखें और दोनों आँखों से ऊपर में रखे हुए दाहिने टखने को देखें।

भावयन् मनसा सार्धं व्याहरन् प्रणवाक्षरम्[८८] **।**
आसनेऽनन्यधीरास्ते रहस्ये विजितेन्द्रियः[८९] **।।४५।।**

(रहस्ये, आसने (स्थितः) विजित-इन्द्रियः ते अनन्यधीराः मनसा सार्धं भावयन् प्रणव अक्षरं व्याहरन् ।)

एकान्त में आसन पर बैठकर जितेन्द्रिय योगी अत्यन्त धीरता से मन ही मन में ओंकार का उच्चारण करे ।

आयुर्विघातकृत् प्राणस्त्वनेनाग्निकुलं गतः[९०] **।**
वायुस्तिष्ठति तत्रैव वह्निना सह निश्चलः[९१] **।।४६।।**

(अनेन आयुः विघातकृत् प्राणः तु अग्निकुलं गतः तत्र एव वायुः वह्निना सह निश्चलः तिष्ठति ।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इससे आयु का विघातक प्राण (अपान) वायु अग्निमण्डल में पहुँचकर वहीं अग्नि के साथ स्थिर हो जाता है।

धूमध्वजजयं यावन्नान्यधीरेवमभ्यसेत्[९२] ।
स्वाहाप्रियालयात् प्राणं शनैरारोपयेत्ततः[९३] ।।४७।।

(यावत् धूम-ध्वज-जयं न (तावत्) अन्यधीः एवं अभ्यसेत्, ततः स्वाहाप्रियालयात् शनैः प्राणं आरोपयेत् ।)

जबतक अग्नि वश में न हो तब तक अस्थिर चित्त वाले इस प्रकार से अभ्यास करें। तब उस प्राण को धीरे-धीरे वह्निमण्डल से ऊपर ले जाएँ ।

नेत्राभ्यां लोकयन्नाभिं मनसा प्रणवं जपेत्[९४] ।
तिष्ठत्यस्मिन् जगत्प्राणः कन्दनाभेरधस्तथा[९५] ।।४८।।

(तथा नेत्राभ्यां नाभिं लोकयन् मनसा प्रणवं जपेत्, (यतः) अस्मिन् कन्दनाभेः अधः जगत्प्राणः तिष्ठति ।)

और दोनों आँखों से नाभि को देखते हुए मन में ओंकार का जप करें । क्योंकि इस कन्दनाभि के नीचे जागतिक प्राण निवास करता है ।

यावन्मनोलयस्तस्मिंस्तावदेवं समभ्यसेत्[९६] ।
एतेन नाभिमध्यस्थो धारणेनैव मारुतः[९७] ।।४९।।

कुण्डलीं याति वह्निश्च दहत्यत्र न संशयः[९८] ।
ततः स वह्निना नागः प्रबोधं याति वायुना[९९] ।।५०।।

(यावत् तस्मिन् मनोलयः तावत् एवं समभ्यसेत्, एतेन नाभिमध्यस्थः धारणेन एव मारुतः कुण्डलीं याति, वह्निः च दहति, ततः स नागः वायुना वह्निना प्रबोधं याति, अत्र न संशयः ।)

जबतक उसमें मनोलय हो तबतक इसी प्रकार अभ्यास करना चाहिए। इस प्रकार नाभि के मध्य में धारण से ही वायु कुण्डली की ओर जाती है और अग्नि भी वहाँ प्रज्वलित होती है, तब वह नाग (कुण्डलिनी) वायुयुक्त वह्नि से जागृत होता है, इसमें सन्देह नहीं ।

प्रबोधे संस्फुरत्यस्मिन् वायुमारोपयेत्ततः[१००] ।
ब्रह्मरन्ध्रे सुषुम्णायां ध्यायन्नोङ्कारमक्षयम्[१०१] ।।५१।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(प्रबोधे संस्फुरति (सति) सुषुम्णायां ब्रह्मरन्ध्रे अक्षयं ओंकारं ध्यायन् अस्मिन् वायुं आरोपयेत् ।)

उस नाग के जगने और चलायमान होने पर सुषुम्ना के अन्दर ब्रह्मरन्ध्र में अक्षय ओंकार का ध्यान करते हुए, उसमें वायु को चढ़ाना चाहिए ।

शनैरारोपयेन्मूर्ध्नि साग्निं वायुमनन्यधीः[१०२] ।
धारयेद्व्योम्नि विप्रेन्द्र साग्निं प्राणं समाहितः[१०३] ।।५२।।

(समाहितः स अग्निं प्राणं व्योम्नि धारयेत्। विप्रेन्द्र, स अनन्यधीः (सन्) अग्निं वायु मूर्ध्नि शनैः आरोपयेत्।)

एकाग्रता से उस ज्योतिर्मय वायु को मस्तक में चढ़ाना चाहिए। हे विप्रेन्द्र, उस ज्योतिर्मय प्राण को सावधानी से ही मस्तकान्तर्गत आकाश में स्थिर करना चाहिए।

तेनैव पूरिते व्योम्नि साङ्गोपाङ्गकलेवरः[१०४] ।
सदाऽऽत्मा राजते तत्र यथा व्योम्नि दिवाकरः[१०५] ।।५३।।

(तेन एव पूरिते व्योम्नि साङ्ग-उपाङ्ग-कलेवर आत्मा सदा तत्र राजते यथा व्योम्नि दिवाकरः ।)

उस प्राण से ही परिपूर्ण मस्तकाकाश में सर्वाङ्गपूर्ण आत्मा सदा प्रकाशमान रहता है, जैसे आकाश में सूर्य ।

शरीरं विसिसृक्षुश्चेदेवं सम्यक् समाचरन्[१०६] ।
एकाक्षरपरं ब्रह्म ध्यायन् प्रणवमीश्वरम्[१०७] ।।५४।।

सम्भिद्य मनसा मूर्ध्नि ब्रह्मरन्ध्रं सवायुना[१०८] ।
प्राणमुन्मोचयेत् पश्चान्महाप्राणे खमध्यमे[१०९] ।।५५।।

(एवं सम्यक् समाचरन्, शरीरं चेत् विसिसृक्षुः, ईश्वरं एकाक्षरपरं प्रणवं ब्रह्म ध्यायन्, मनसा मूर्ध्नि ब्रह्मरन्ध्रं सवायुना सम्भिद्य, पश्चात्-ख-मध्यमे महाप्राणे प्राणम् उन्मोचयेत् ।)

इस प्रकार अच्छी तरह अभ्यास करते हुए यदि शरीर छोड़ने की इच्छा हो तो ईश्वररूप एकाक्षर ओंकार का ध्यान करते हुए, चित्त के द्वारा मस्तकाकाश में ब्रह्मरन्ध्र को वायु के साथ बेधकर सर्वत्र भरे हुए आकाशान्तर्गत महाप्राण में प्राण को छोड़ देना चाहिए ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देहातीते जगत्प्राणे शून्ये नित्ये ध्रुवे पदे[११०]।
आकाशे परमानन्दे स्वात्मानं योजयेद्धिया[१११]।
ब्रह्मैवासौ भवेत् पुत्र न पुनर्जन्मभाग् भवेत्[११२]।।५६।।

(देह-अतीते, जगत्-प्राणे, शून्ये, नित्ये, ध्रुवे पदे, आकाशे, परम-आनन्दे, स्व-आत्मानं धिया योजयेत् । पुत्र, असौ ब्रह्म एव भवेत्, पुनः जन्मभाग् (च) न भवेत् ।

देह से अतिरिक्त विश्वरूपप्राण जो निरालम्ब, नित्य, ध्रुव, परमपद आकाश, परमानन्द स्वरूप है, उसमें अपनी आत्मा को बुद्धिपूर्वक लीन कर देना चाहिए। हे पुत्र, इससे वह ब्रह्मस्वरूप ही हो जाता है और पुनः जन्म ग्रहण नहीं करता है ।

उक्तान्येतानि चत्वारि योगाङ्गानि तपोधन[११३]।
प्रत्याहारादि चत्वारि शृणुष्वाभ्यन्तराणि च[११४]।।५७।।

(तपोधन! एतानि चत्वारि योगाङ्गानि उक्तानि, प्रत्याहारादि चत्वारि आभ्यन्तराणि च शृणुष्व ।)

हे तपोधन, इन चार योगाङ्गों का निरूपण किया गया। अब प्रत्याहार आदि चार आन्तरिक योगाङ्गों को सुनो ।

इन्द्रियाणां विचरतां विषयेषु स्वभावतः[११५]।
बलादाहरणं तेषां प्रत्याहारः स उच्यते[११६]।।५८।।

(विषयेषु स्वभावतः विचरतां इन्द्रियाणां तेषां बलात् आहरणं, स प्रत्याहारः उच्यते।)

विषयों में स्वाभाविक रूप से विचरने वाले इन्द्रियों को उनसे बलपूर्वक पीछे लौटाना ही प्रत्याहार कहा गया है।

यद्यत् पश्यति तत् सर्वं पश्येदात्मवदात्मनि[११७]।
प्रत्याहारः स च प्रोक्तो योगविद्भिर्महात्मभिः[११८]।।५९।।

(यत् यत् पश्यति तत् सर्वम् आत्मवत् आत्मनि पश्येत्। स च महात्मभिः योगविद्भिः प्रत्याहारः प्रोक्तः।)

जो कुछ भी दिखाई देता है, उन सभी को आत्मा के समान आत्मा में ही देखे इसे महात्मा योगियों ने प्रत्याहार कहा है।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कर्माणि यानि नित्यानि विहितानि शरीरिणाम्[११९] ।
तेषामात्मन्यनुष्ठानं मनसा यद्बहिर्विना[१२०] ।
प्रत्याहारो भवेत् सोऽपि योगसाधनमुत्तमम्[१२१] ।।६०।।

(शरीरिणां यानि नित्यानि विहितानि कर्माणि तेषां बहिः बिना मनसा आत्मनि यत् अनुष्ठानं सः अपि योग-साधनम् उत्तमं प्रत्याहारः भवेत्।)

शरीरधारियों के लिए जो नित्य विहित कर्म है, उनका बाह्य (साधनों) के बिना मन से ही आत्मा में अनुष्ठान करना, वह योग का उत्तम साधन भी प्रत्याहार होता है ।

प्रत्याहारं प्रशंसन्ति संयुता योगिनः सदा[१२२] ।
अष्टादशसु यद्वायोर्मर्मस्थानेषु धारणम्[१२३] ।
स्थानात् स्थानात् समाकृष्य प्रत्याहारः स चोत्तमः[१२४] ।।६१।।

(संयुता योगिनः सदा प्रत्याहारं प्रशंसन्ति, (सः) अष्टादशसु मर्मस्थानेषु यत् वायोः धारणं (पुनः) स्थानात् स्थानात् समाकृष्य स च उत्तमः प्रत्याहारः ।)

अभ्यास में लगे हुए योगी सदा उस प्रत्याहार की प्रशंसा किया करते हैं, जिसमें अठारहों मर्मस्थानों में वायु को स्थिर करना, फिर एक-एक स्थान से उचित रीति से वायु को खींचना होता है, वही उत्तम प्रत्याहार है ।

(**टिप्पणी** - अगले तेरह श्लोकों के द्वारा वसिष्ठ ने १८ मर्मस्थानों तथा उनकी स्थिती का वर्णन अलग-अलग किया है ।)

पादाङ्गुष्ठौ च गुल्फौ च जङ्घामध्यौ तथैव च[१२५] ।
चित्योर्मूले च जानू च मध्ये चोरुद्वयस्य च[१२६] ।।६२।।

(पाद-अङ्गुष्ठौ च गुल्फौ च जङ्घामध्यौ तथा एव चित्योः मूले च जानू च उरुद्वयस्य मध्ये च ।)

पाँव के अँगूठे, दोनों टखने, जङ्घाओं के मध्य, दोनों चिति (घुटने का नीचे का भाग) के मूल, दोनों घुटने और ऊरुओं के मध्य -

पायुमूलं ततः पश्चान्मध्यदेहं च मेढ्रकम्[१२७] ।
नाभिं च हृदयं तस्य कण्ठकूपस्तथैव च[१२८] ।।६३।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(वत्स, ततः पश्चात् पायुमूलं मध्यदेहं च मेढ्रकं च नाभि हृदयं च, तथा एव कण्ठकूपः च -)

हे पुत्र उस के बाद गुदा का मूल, देह मध्य, लिङ्ग, नाभि हृदय तथा कण्ठ कूप -

तालुमूलं च नासायाः मूलं चाक्ष्णोश्च मध्यमम्[१२९]।
भ्रुवोर्मध्यं ललाटं च मूर्धा च मुनिसत्तम[१३०]।
मर्मस्थानानि चैतानि मानं तेषां पृथक् शृणु[१३१]।।६४।।

(तालुमूलं च नासायाः मूलं च अक्ष्णोः मध्यमः च भ्रुवोः मध्यमं च ललाटं च मूर्धा च, एतानि मर्मस्थानानि, मुनिसत्तम, तेषां मानं च पृथक् शृणु ।)

तालुमूल, नासामूल, दोनों आँखों के मध्यबिन्दु, दोनों भौहों के मध्य, मस्तक और मूर्धा - पुत्र,ये मर्मस्थान कहलाते हैं । हे मुनिश्रेष्ठ अब उनका पृथक्-पृथक् प्रमाण सुनो ।

पादाङ्गुष्ठात्तु पादस्य पृथक् स्थानं न विद्यते[१३२]।
पादान्मानं तु गुल्फस्य सार्धाङ्गुलचतुष्टयम्[१३३]।।६५।।

(पादःअङ्गुष्ठात् तु पादस्य पृथक् स्थानं न विद्यते, पादात् गुल्फस्य मानं तु सार्ध-अङ्गुल-चतुष्टयम् (विद्यते)।)

पांव का अँगूठा और पांव इसके स्थान में कोई भेद नहीं है। पाँव (तलवा) से टखने का माप साढ़े चार अङ्गुल है।

गुल्फाज्जङ्घस्य मध्यं विज्ञेयं तु दशाङ्गुलम्[१३४]।
जङ्घामध्याच्चितेर्मूलं यत्तदेकादशाङ्गुलम्[१३५]।।६६।।

(गुल्फात् जङ्घस्य मध्यं तु दश अङ्गुलं विज्ञेयं, जङ्घा मध्यात् यत् चितेः मूलं तत् एकादश अङ्गुलम्।)

टखने से जँघा का मध्य दस अँगुल जानो जंघामध्य से चितिमूल तक ग्यारह अंगुल है।

चितिमूलान्मुनिश्रेष्ठ जानुं सार्धाङ्गुलद्वयम्[१३६]।
जानोर्नवाङ्गुलं प्राहुस्तूरुमध्यं मुनीश्वर[१३७]।।६७।।

(मुनिश्रेष्ठ, चितिमूलात् जानुं सार्ध-अङ्गुलद्वयम् । मुनीश्वरः जानोः नव अङ्गुलं तु उरुमध्यं प्राहुः ।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हे मुनिश्रेष्ठ ! चितिमूल से जानु (घुटना) ढाई अंगुल और हे मुनीश्वर । जानु से ऊरुमध्य नौ अंगुल है ।

उरुमध्यात्तथा वत्स पायुमूलं नवाङ्गुलम्[१३८] ।
देहमध्यं तथा पायोर्मूलात् सार्धाङ्गुलद्वयम्[१३९] ।।६८।।

(तथा वत्स, उरुमध्यात् पायुमूलं नव-अङ्गुलम् तथा पायोः मूलात् देहमध्यं सार्ध-अङ्गुलद्वयम् ।)

हे वत्स, उरुमध्य से गुदामूल नौ अंगुल है और गुदामूल से देहमध्य ढाई अंगुल है।

देहमध्यात् पुनर्मेढ्रं तद्वत् सार्धाङ्गुलद्वयम्[१४०] ।
मेढ्रान्नाभिश्च विज्ञेया तथा सार्धदशाङ्गुलम्[१४१] ।।६९।।

(तत्-वत् पुनः देहमध्यात् मेढ्रं सार्ध-अङ्गुलद्व. तथा च मेढ्रात् नाभिः सार्ध दश-अङ्गुलं विज्ञेया।)

उसी प्रकार देहमध्य से लिंग ढाई अंगुल है और लिंग से नाभि साढे दस अंगुल जानो।

चतुर्दशाङ्गुलं नाभेर्हृन्मध्यं च द्विजोत्तम[१४२] ।
षडङ्गुलस्तु हृन्मध्यात् कण्ठकूपस्तथैव च[१४३] ।।७०।।

(द्विजोत्तम, नाभेः चतुर्दश-अङ्गुलं च हृत्-मध्यं, तथा एव च हृत्-मध्यात् कण्ठकूपः, तु षट्-अङ्गुलः ।)

हे द्विजोत्तम, नाभि से चौदह अंगुल हृदयमध्य है और उसी प्रकार हृदयमध्य से कण्ठकूप छः अंगुल है ।

कण्ठकूपात्तु जिह्वाया मूलं स्याच्चतुरङ्गुलम्[१४४] ।
नासामूलं तु जिह्वाया मुलात्तु चतुरङ्गुलम्[१४५] ।।७१।।

(कण्ठकूपात् जिह्वायाः मूलं तु चतुः-अङ्गुलं स्यात्, तु जिह्वाया मूलात् नासामूलं तु चतुः अङ्गुलम् ।)

कण्ठकूप से जिह्वा का मूल चार अंगुल है और जिह्वामूल से नासामूल चार अंगुल है ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नेत्रस्थानं तु तन्मूलादर्धाङ्गुलमितीष्यते[१४६]।
तस्मादर्धाङ्गुलं विद्धि भ्रुवोरन्तरमात्मनः[१४७]।।७२।।

(तत् मूलात् नेत्रस्थानं तु अर्ध-अङ्गुलं इति इष्यते, तस्मात् आत्मनः भ्रुवोः अन्तरः अर्ध-अङ्गुलं विद्धि ।)

नासामूल से नेत्रस्थान आधा अंगुल है और नेत्रस्थान से अपनी भौंहो का मध्य आधा अंगुल जानो ।

ललाटं तु भ्रुवोर्मध्यादूर्ध्वं स्यादङ्गुलत्रयम्[१४८]।
ललाटाद्व्योमसंज्ञं तदङ्गुलत्रयमेव हि[१४९]।।७३।।

(भ्रूवोः मध्यात् तु ललाटं अङ्गुल-त्रयं ऊर्ध्वं स्यात्, ललाटात् हि व्योमसंज्ञं तत् अङ्गुलत्रयं एव ।)

भौंहों के मध्य से ऊपर ललाट तीन अङ्गुल है और ललाट से व्योम नामक स्थान (अर्थात् मस्तक) भी तीन ही अंगुल है ।

स्थानेष्वेतेषु मनसा वायुमारोप्य धारयेत्[१५०]।
स्थानात् स्थानात् समाकृष्य प्रत्याहारोत्तमो मतः[१५१]।।७४।।

(एतेषु स्थानेषु मनसा वायुम् आरोप्य स्थानात् स्थानात् समाकृष्य धारयेत्, (इति) उत्तमः प्रत्याहारः मतः ।)

इन स्थानों में मन से वायु को उठाकर, एक-एक स्थान से क्रमशः दूसरे स्थान में खींचकर स्थिर करते जाना उत्तम प्रत्याहार माना गया है ।

य एवं कुरुते विद्वान् योगमेति यथाविधि[१५२]।
स याति ब्रह्मसदनं पुनर्नावर्तते ततः[१५३]।।७५।।

(यथाविधिः यः विद्वान् एवं कुरुते सः योगं एति, ब्रह्म-सदनं याति, ततः पुनः न आवर्तते ।)

विधिपूर्वक जो विद्वान् इस प्रकार करता है, वह योग को प्राप्त करता है और वही ब्रह्मपद को जाताहै, तथा वहाँ से फिर नहीं लौटता है ।

✳ (इति वसिष्ठसंहितायां योगकाण्डे तृतीयोऽध्यायः)

इस प्रकार वसिष्ठसंहिता योगकाण्ड का तृतीय अध्याय समाप्त हुआ।

CC-0 Nepal Sanskrit Academy, Kathmandu Collection

चतुर्थोऽध्यायः

वसिष्ठ उवाच[१] -

अथेदानीं प्रवक्ष्यामि धारणाः पञ्च तत्त्वतः[२]।
समाहितामना भूत्वा शृणु पुत्रक सुव्रत[३]।।१।।

(अथ इदानीं पञ्च धारणाः तत्त्वतः प्रवक्ष्यामि, सुव्रत पुत्रक, समाहितमना भूत्वा शृणु ।)

अब वसिष्ठजी बोले - मैं पांच धारणाओं का यथार्थ निरूपण करता हूँ। हे निष्ठावान पुत्र, एकाग्रचित्त होकर सुनो ।

यमादिगुणसंयुक्ते मनसः स्थितिरात्मनि[४]।
धारणा प्रोच्यते सद्भिर्योगशास्त्रार्थवेदिभिः[५]।।२।।

(योगशास्त्रार्थ वेदिभिः सद्भिः यम आदि गुण संयुक्ते मनसः आत्मनि स्थितिः धारणा प्रोच्यते।)

योगशास्त्र के ज्ञाता योगी लोग यम आदि गुणों से युक्त - अपने में मन की स्थिरता को धारणा कहते हैं।

हृदयेऽथान्तराकाशे यद्बाह्याकाशधारणम्[६]।
एषा च धारणा प्रोक्ता तथैवाकाशगो भवेत्[७]।।३।।

(हृदये अथ-अन्तर-आकाशे यत् बाह्य-आकाश-धारणं, एषा च धारणा प्रोक्ता, तथा एव आकाशगः भवेत्।)

हृदय में अन्तराकाश के साथ बाह्याकाश का चिन्तन करना, इसे ही धारणा कहा गया है और उससे योगी (आन्तरिक) आकाशविहारी बन सकता है।

भूमिरापस्तथा तेजो वायुराकाशमेव च[८]।
एतेषु पञ्च वर्णानां धारणं धारणा स्मृता[९]।।४।।

(भूमिः आपः तेजः तथा वायुः आकाशं एव च, तेषु पञ्च वर्णानां धारणं धारणा स्मृता।)

पृथ्वी, जल, तेज, वायु और आकाश इनमें पाँच बीज वर्णों (ल,व,र,य,ह) का चिंतन करना धारणा कही गई है।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तेष्वेव पञ्चदेवानां धारणं चापि धारणा[१०] ।।५।।

(तेषु एव पञ्चदेवानां धारणं च अपि धारणा।)

उनमें ही पांच देवताओं का चिन्तन करना भी धारणा कही गई है।

पादादि जानुपर्यन्तं पृथिवीस्थानमुच्यते[११]।
आजानोः पायुपर्यन्तमपां स्थानं प्रकीर्तितम्[१२]।
आपायोर्हृदयान्तं यद्वह्निस्थानं तदुच्यते[१३] ।।६।।

(पाद-आदि जानु-पर्यन्तं पृथिवी-स्थानं उच्यते। आजानोः पायु-पर्यन्तम् अपां स्थानं प्रकीर्तितम्। आपायोः यत् हृदय-अन्तं तत् वह्निस्थानम् उच्यते।)

पांव से जानु तक पृथ्वी का स्थान कहा गया है। जानु से गुदा तक जल का स्थान कहा गया है और गुदा से हृदय तक के स्थान को तेज-स्थान कहते हैं।

आहृन्मध्याद् भ्रुवोर्मध्यं यावद्वायुस्थलं स्मृतम्[१४]।
आभ्रूमध्यात्तु मूर्धान्तमाकाशमिति चोच्यते[१५] ।।७।।

(आहृत्-मध्यात् भ्रूवोः मध्यं यावत् वायुस्थलं स्मृतम्। आभ्रू-मध्यात् तु मूर्धा-अन्तम् आकाशम् इति च उच्यते।)

हृदय-मध्य से भौहों के मध्य तक वायु का स्थान कहा गया है, और भौहों के मध्य से कपालान्त तक आकाश का स्थान कहा गया है।

एतेषां पृथिवीस्थाने लकारं धारयेद् बुधः[१६]।
वकारं धारयेदप्सु रेफं वह्नौ च धारयेत्[१७]।
यकारं धारयेद्वायौ हकारं व्योम्नि धारयेत्[१८] ।।८।।

(बुधः एतेषां पृथिवीस्थाने लकारं धारयेत्, अप्सु वकारं धारयेत्, वह्नौ रेफं धारयेत्, वायौ यकारं धारयेत्, व्योम्नि च हकारं धारयेत्।)

इनमें से योगी पृथिवी स्थान पर 'लकार' की धारणा करे, जल के स्थान पर 'वकार' की धारणा करे, तथा तेज के स्थान पर 'रकार' की धारणा करे। वायु के स्थान में 'यकार' की धारणा करे और आकाश के स्थान में 'हकार' की धारणा करे।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पृथिव्यां धारयेद्विद्वान् ब्रह्माणं परमेष्ठिनम्[१९]।
विष्णुमप्स्वनले रुद्रं महत्तत्त्वं तु मारुते[२०]।
आकाशे धारयेद्देवमव्यक्तं जगदीश्वरम्[२१]।।९।।

(विद्वान (योगी) पृथिव्यां परमेष्ठिनं ब्रह्माणं धारयेत्, अप्सु विष्णुं, अनले रुद्रं, मारुते महत् तत्वं, एवं तु आकाशे अव्यक्तं जगदीश्वरं धारयेत् ।)

विद्वान् योगी पृथिवी के स्थान में पितामह ब्रह्मदेवता की धारणा करे। जल के स्थान में विष्णु देवता की, अग्नि स्थान में रुद्र की, वायु के स्थान में महत्तत्त्व की तथा आकाश के स्थान में अव्यक्त परमात्मा की धारणा करे ।

नीत्वा वायुं पृथिव्यां तु वर्णदेवसमन्वितम्[२२]।
धारयेत् पञ्च घटिकाः पृथिवीजयमाप्नुयात्[२३]।।१०।।

(वर्णदेवसमन्वितं वायुं तु पृथिव्यां नीत्वा पञ्च घटिका धारयेत्, (एवं) पृथिवी-जयम् आप्नुयात् ।)

लकार और ब्रह्मदेवता के साथ प्राणवायु को पृथिवी स्थान में ले जाकर पंच घटिका (दो घण्टे) तक धारण करे । इससे पृथ्वीतत्त्व पर विजय प्राप्त होती है ।

यथोक्तवर्णदेवेन संयुक्तं वायुमप्सु च[२४]।
धारयेत् पञ्चघटिकाः सर्वरोगैः प्रमुच्यते[२५]।।११।।

(यथा-उक्त-वर्ण-देवेन संयुक्तं वायुम् अप्सु च पञ्चघटिकाः धारयेत्, सर्वरोगैः प्रमुच्यते।)

(यदि) उपर्युक्त कहे गए वर्णों और देवताओं के क्रम के साथ वायु का जल तत्त्व में पंच घटिका (दो घण्टे) तक धारणा करे तो इससे सभी रोगों से छुटकारा होता है ।

पूर्ववद्धारणाद्वह्नौ वह्निनाऽसौ न दह्यते[२६]।।१२।।

(पूर्ववत् वह्नौ धारणात् असौ वह्निना न दह्यते ।)

पूर्ववत् तेज की धारणा करने से अग्नि से नहीं जलता है ।

मरुतां मरुतां स्थाने वर्णदेवसमन्वितम्[२७]।
धारयेत् पञ्चघटिका वायुवद्व्योमगो भवेत्[२८]।।१३।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(मरुतां वर्णदेवसमन्वितं मरुतां स्थाने पञ्चघटिका धारयेत्, वायुवत् व्योमगः भवेत् ।)

वायु को वर्ण और देवताओं के साथ वायुस्थान में पंच घटिका तक धारण करने से वायु के समान (आन्तरिक) आकाशविहारी होता है ।

आकाशे वायुमारोप्य वर्णदेवसमन्वितम्[२९]।
धारयेत् पञ्टघटिका जीवन्मुक्तो भविष्यति[३०]।
अल्पमूत्रपुरीषः स्यादर्वागेव च वत्सरात्[३१]।।१४।।

(वर्णदेवसमन्वितं वायुम् आरोप्य आकाशे पञ्चघटिका धारयेत्, जीवन्मुक्तः भविष्यति, वत्सरात् अर्वाक् एव अल्पमूत्र-पुरीषः च स्यात् ।)

वर्ण और देवता के साथ वायु को आकाश-स्थान में आरोपित कर पंच घटिका तक धारणा करने से योगी जीवन्मुक्त होगा और इससे एक वर्ष के अन्दर ही मल-मूत्र की अल्पता होती है ।

पञ्चमी धारणेयं स्यात् सर्वदुःखविनाशिनी।।१५।।

(इयं पञ्चमी धारणा सर्वदुःखविनाशिनी स्यात्।)

यह पाँचवी धारणा सभी दुःखों को दूर करनेवाली है।

आसनाद्वाहनादन्यैर्न भेत्तुं शक्य एव सः[३२]।
धारणं यदिदं वायोः स्थानेष्वेतेषु पञ्चसु[३३]।।१६।।

(एतेषु पञ्चसु स्थानेषु यत् वायोः धारणं, एव इदं सः आसनात् वाहनात् अन्यैः भेत्तुं न शक्यः।)

इन पाँच स्थानों में प्राणवायु का धारण करने से योगी अपने आसन, वाहन आदि से किसी के द्वारा चालित नहीं किया जा सकता।

ध्यानं सम्प्रति वक्ष्यामि श्रृणु शक्ते समाहितः[३४]।
ध्यानमेव हि जन्तूनां कारणं बन्धमोक्षयोः[३५]।।१७।।

(सम्प्रति ध्यानं वक्ष्यामि, शक्ते, समाहितः श्रृणु, ध्यानम् एव हि जन्तूनां बन्धमोक्षयोः कारणम्।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अब ध्यान के विषय में कहता हूँ। हे शक्ते, एकाग्रचित्त होकर सुनो। ध्यान (चिन्तन) ही प्राणियों के बन्धन और मोक्ष का कारण हैं।

मर्मस्थानानि नाडीनां संस्थानं च पृथक् पृथक्[३६]।
वायूनां स्थानकर्माणि विदित्वा ध्यानमाचरेत्[३७]।।१८।।

(मर्मस्थानानि नाडीनां संस्थानं वायूनां स्थानकर्माणि च पृथक् पृथक् विदित्वा ध्यानम् आचरेत्।)

मर्मस्थानों, नाडियों के संस्थानों (विस्तारों) तथा वायु के स्थानों और कार्यो को पृथक् पृथक् जानकर ध्यान का अभ्यास करना चाहिए।

ध्यानमात्मस्वरूपस्य वेदनं मनसा भवेत्[३८]।
तदेव द्विविधं प्रोक्तं सगुणं निर्गुणं तथा[३९]।।१९।।

(आत्मस्वरूपस्य मनसा वेदनं एव ध्यानं भवेत्। तत् द्विविधं प्रोक्तं सगुणं तथा निर्गुणम्।)

निज-स्वरूप को तत्त्वतः मन से चिन्तन करना ही ध्यान होता है। वह ध्यान दो प्रकार का कहा गया है - सगुण तथा निर्गुण।

सगुणं पञ्चधा प्रोक्तमेकमेव हि निर्गुणम्[४०]।।२०।।

(सगुणं पञ्चधा प्रोक्तं निर्गुणं हि एकम् एव।)

सगुण पांच प्रकार का कहा गया है और निर्गुण एक ही प्रकार का।

एकं ज्योतिर्मयं शुद्धं सर्वगं व्योमवद् दृढम्[४१]।
अत्यच्छममलं नित्यमादिमध्यान्तवर्जितम्[४२]।।२१।।

(एकं ज्योतिर्मयं शुद्धं व्योमवत्, सर्वगं, दृढं, अति-अच्छं, अमलं, नित्यं आदि-मध्य-अन्त वर्जितम्-)

एकतत्त्व, ज्योतिर्मय, शुद्ध, आकाश के समान सर्वगामी, स्थिर, अत्यन्त स्वच्छ निर्मल, नित्य, आदि-मध्य और अन्त से रहित -

स्थूलं सूक्ष्ममनाकाशमसंस्पृष्टमचाक्षुषम्[४३]।
न रसं न च गन्धाख्यमप्रमेयमनौपमम्[४४]।।२२।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(स्थूलं सूक्ष्मम् अनाकाशम् असंस्पृष्टम् अचाक्षुषं न रसं न गन्धाख्यं च अप्रमेयम् अनौपमम् ।)

विराट, सूक्ष्म, आकाश (शब्द) स्पर्श, रूप, रस, गन्ध से परे, ज्ञान एवं उपमा से विलक्षण -

आनन्दमजरं नित्यं सदसत् सर्वकारणम्[४५]।
सर्वाधारं जगद्रूपममूर्तमजमव्ययम्[४६]।।२३।।

(आनन्दम्, अजरं, नित्यं, सत्-असत् सर्वकारणं, सर्व-आधारं, जगत् रूपम्, अमूर्त्तम्, अजम्, अव्ययम्।)

आनन्द, अजर, नित्य, सत् एवं असत् आदि सभी का मूलकारण, सभी का मूल आधार जगत्स्वरूप, अमूर्त, अज, अव्यय -

अदृश्यं दृश्यमध्यस्थं बहिःस्थं सर्वतोमुखम्[४७]।
सर्वदृक् सर्वतः पादं सर्वस्पृक् सर्वतः शिरः[४८]।।२४।।

(अदृश्यं दृश्यमध्यस्थं-बहिःस्थं, सर्वतोमुखं सर्वतः सर्वदृक्, पादं, सर्वतः शिरः, सर्व-स्पृक्।)

अदृश्य, प्रत्येक के भीतर-बाहर रहनेवाला, सभी जगह उपस्थित रहनेवाला, सर्वसाक्षी, अनन्त पांवोंवाला, अनन्त शिरवाला, अनन्त स्पर्शवाला -

ब्रह्म ब्रह्ममयोऽहं स्यामितियद्वेदनं भवेत्[४९]।
तदेव निर्गुणं ध्यानं सगुणं च ब्रवीमि ते[५०]।।२५।।

(ब्रह्म, ब्रह्ममय - अहं स्याम, इति यत् वेदनं भवेत् तत् एव निर्गुणं ध्यानं. सगुणं च ते ब्रवीमि।)

ऐसा ब्रह्म के समान मैं ब्रह्म बनूं। ऐसी संवेदना होना ही निर्गुण ध्यान है। अब मैं सगुण ध्यान का वर्णन करता हूँ।

हृत्पद्मेष्टदलोपेते कन्दमध्यात् समुत्थिते[५१]।
द्वादशाङ्गुलनालेऽस्मिंश्चतुरङ्गुलवन्मुखे[५२]।
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
प्राणायामैर्विकसिते केसरान्वितकर्णिके[५३]।।२६।।

(कन्दमध्यात् समुत्थिते प्राणायामैः विकसिते द्वादश अङ्गुल नाले चतुरंगुलवत् अष्टदलोपेते केसरान्वितकर्णिके हृत्पद्मे अस्मिन् मुखे -)

कन्द के मध्य से उठा हुआ, प्राणायाम से विकसित जो बारह अंगुल नालवाला, चार अंगुल विस्तारवाला, अष्टदलयुक्त तथा केसरयुक्त कर्णिकावाला हृदयकमल है, उसमें -

वासुदेवं जगन्नाथं नारायणमनामयम्[५४]।
चतुर्भुजमुदाराङ्गं शङ्खचक्रगदाधरम्[५५]।।२७।।

(वासुदेवं, जगन्नाथं, नारायणम्, अनामयं, चतुर्भुजम्, उदार-अङ्गं, शङ्खचक्र-गदाधरम्।)

वासुदेव, जगन्नाथ, नारायण, विशुद्ध, चतुर्भुज, प्रशस्तअङ्गवाला, शङ्ख-चक्र-गदाधारी-

किरीटकेयूरधरं पद्मपत्रनिभेक्षणम्[५६]।
श्रीवत्सवक्षसं विष्णुं पूर्णचन्द्रनिभाननम्[५७]।।२८।।

(किरीट-केयूरं-धरं, पद्मपत्रनिभ-इक्षणं, श्रीवत्सवक्षसं; पूर्णचन्द्र-निभ आननं, विष्णुम्-)

किरीट तथा केयूरधारी, कमल के पत्ते के समान नेत्रवाले, श्रीवत्स से चिह्नित वक्षवाले, पूर्णचन्द्र के समान मुखवाले, विष्णु -

पद्मोदरदलाभौष्ठं सुप्रसन्नं शुचिस्मितम्[५८]।
शुद्धस्फटिकसंकाशं पीतवाससमच्युतम्[५९]।।२९।।

(पद्म-उदर-दल-आभा-ओष्ठं, सुप्रसन्नं, शुद्धस्फटिकसंकाशं, शुचि-स्मितं, पीतवाससम्, अच्युतम्-)

कमलदल के समान अरुण ओष्ठवाला, अत्यन्त प्रसन्न, निर्मल स्फटिक के समान कान्तिमान्, पवित्र मुस्कुराहट वाले, पीतवस्त्रधारी, अच्युत -

पद्मच्छविपदद्वन्द्वं परमात्मानमीश्वरम्[६०]।।
प्रभाभिर्भासयद्रूपं परितः पुरुषोत्तमम्[६१]।।३०।।

(पद्मच्छवि-पद-द्वन्द्वं परमात्मानं परितः प्रभाभिः भासयत् रूपं ईश्वरं पुरुषोत्तमम्-)

कमल की कान्ति के सदृश चरणवाले, परमात्मा, चारों तरफ कान्ति से भासमान रूपवाला ईश्वर, महापुरुष -

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मनसाऽऽलोक्य देवेशं सर्वभूतहृदिस्थितम्[६२]।
सोऽहमात्मनि विज्ञानं ध्यानं तत् सगुणं स्मृतम्[६३]।।३१।।

(मनसा आलोक्य सर्वभूत-हृदिस्थितं देवेशं स अहं (इति) आत्मनि विज्ञानं, तत् सगुणं ध्यानं स्मृतम्।)

ऐसा मन में चिन्तन कर, सब प्राणियों के हृदय में स्थित वह देवेश मैं ही हूँ, ऐसे विशिष्ट ज्ञान प्राप्त करने को सगुण ध्यान कहते हैं ।

हृत्सरोरुहमध्येऽस्मिन् प्रकृत्यात्मककर्णिके[६४]।
अष्टैश्वर्यदलोपेते विद्याकेसरसंयुते[६५]।।३२।।

(प्रकृति-आत्मक-कर्णिके, अष्ट-ऐश्वर्य-दलोपेते, विद्याकेसर-संयुते, अस्मिन् हृत्सरोरुहमध्ये-)

मूलप्रकृतिरूपी कर्णिकावाले, आठ ऐश्वर्यरूपी दलवाले, अध्यात्म-विद्यारूपी केसरवाले, हृदयकमल के मध्य में -

ज्ञाननाले महत्कन्दे प्राणायामप्रबोधिते[६६]।
विश्वार्चिषं महावह्निं ज्वलन्तं विश्वतोमुखम्[६७]।।३३।।

(ज्ञाननाले, महत्कन्दे, प्राणायाम प्रबोधिते विश्वार्चिषं, महावह्निं विश्वतोमुखं ज्वलन्तम्-)

ज्ञानरूपी नालवाले, महत्तत्त्वरूपी कन्दवाले, प्राणायाम के अभ्यास से प्रबोधित अखिल ज्योतिःस्वरूप, महातेजस्वी, सर्वत्र प्रकाशमान् -

वैश्वानरं जगद्योनिं शिखातन्विनमीश्वरम्[६८]।
तापयन्तं स्वकं देहमापादतलमस्तकम्[६९]।।३४।।

(वैश्वानरं जगत्-योनिं शिखातन्विनम् आपादतलमस्तकं स्वकं देहं तापयन्तम् ईश्वरं -)

आन्तरिक अग्निस्वरूप जगत् का कारण, ज्योतिशिखारूप पांव से मस्तक तक अपने शरीर को देदीप्यमान करने वाले ईश्वर की -

निर्वातदीपवत्तस्मिन् दीपितं हव्यवाहनम्[७०]।
दृष्ट्वा तस्य शिखामध्ये परमात्मानमीश्वरम्[७१]।।३५।।

(निर्वात-दीपवत् तस्मिन् हव्यवाहनं दीपितं दृष्ट्वा तस्य शिखामध्ये परमात्मानम् ईश्वरं)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निर्वात दीप के समान प्रकाशित अग्नि की कल्पना कर, उसकी शिखा के मध्य में परमात्मा, परमेश्वर को -

नीलतोयदमध्यस्थं विद्युल्लेखेव भास्वरम्[७२]।
नीवारशूकवद्रूपं पीताभं सर्वकारणम्[७३]।।३६।।

(नीलतोयदमध्यस्थं, विद्युत्-लेखा-इव भास्वरं, नीवारशूकवत् पीताभं रूपं, सर्वकारणम्)

नीलमेघ के अन्दर चमकती हुई बिजली के समान, नीवारतन्तु के समान पीतवर्ण, सभी के मूल -

ज्ञात्वा वैश्वानरं देवं सोऽहमेवेति या मतिः[७४]।
सगुणेषूत्तमं ह्येतत् ध्यानं योगविदो विदुः[७५]।।३७।।

(वैश्वानरं देवं ज्ञात्वा सः अहं एव इति या मतिः, एतत् हि सगुणेषु उत्तमं ध्यानं योगविदः विदुः-)

वह अग्निदेव मैं ही हूँ - ऐसी निष्ठा करने को योगी लोग सगुण ध्यानों में उत्तम ध्यान कहते हैं।

वैश्वानरत्वं सम्प्राप्य मुक्तिं तेनैव गच्छति[७६]।।३८।।

(वैश्वानरत्वं सम्प्राप्य तेन एव मुक्तिं गच्छति।)

उस अग्निदेवत्व स्वरूप को प्राप्त कर (योगी) उसी से मुक्ति मार्ग को जाता है।

भ्रुवोर्मध्ये तथाऽऽत्मानं भारूपं सर्वकारणम्[७७]।
स्थाणुवन्मूर्धपर्यन्तं मध्यदेहात् समुत्थितम्[७८]।।३९।।

(तथा भ्रुवोः मध्ये भारूपं मध्यदेहात् मूर्धपर्यन्तं स्थाणुवत् समुत्थितं सर्वकारणम् आत्मानम् -)

उसी प्रकार, भौहों के मध्य में कान्ति-स्वरूप, देहमध्य से मस्तक तक स्थाणु (स्तम्भ) के समान उठा हुआ, सभी का मूल-आत्मा को-

जगत्कारणमव्यक्तं ज्वलन्तममितौजसम्[७९]।
मनसालोक्य सोऽहं स्याममप्येतद्ध्यानमुत्तमम्[८०]।।४०।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(जगत्कारणम् अमित-ओजसं ज्वलन्तम् अव्यक्तं मनसा आलोक्य स अहं स्याम्, एतत्

अपि उत्तमं ध्यानम्।)

जगत्कारण, महाप्रतापी, देदीप्यमान, अव्यक्त, (आत्मा को) मन से कल्पना कर - मैं वही हूँ, इस प्रकार का ध्यान भी उत्तम है।

अथवाऽष्टदलोपेते कर्णिकाकेसरान्विते[८१]।
उन्निद्रहृदयाम्भोजे सोममण्डलमध्यगे[८२]।।४१।।

(अथवा सोममण्डलमध्यगे कर्णिका-केसर-अन्विते अष्टदलोपेते उन्निद्र हृदयाम्भोजे-)

अथवा, सोममण्डल के मध्य में कर्णिका तथा केसर से युक्त आठ दलवाले जाग्रत हृदयकमल में -

स्वात्मानमर्भकाकारं भोक्तृरूपिणमव्ययम्[८३]।
सुधारसं विमुञ्चद्भिः शशिरश्मिभिरावृतम्[८४]।।४२।।

(स्वात्मानम् अर्भक-आकारं अव्ययं भोक्तृरूपिणं, सुधारसं विमुञ्चद्भिः शशि-रश्मिभिः आवृतम्-)

अपने आप को बालरूप अव्यय भोक्तारूप से और अमृत की वर्षा करती हुई चन्द्रकिरणों से घिरी हुई-

षोडशच्छन्दसंयुक्तं शिरःपद्मादधोमुखात्[८५]।
निर्गतामृतधाराभिः सहस्राभिः समन्ततः[८६]।।४३।।

(षोडश-छन्द-संयुक्तं अधोमुखात् शिरः-पद्मात् समन्ततः सहस्राभिः निर्गत-अमृतधाराभिः-)

सोलह छन्दवाले अधोमुख शिरःकमल से चारों तरफ बरसती हुई हजारों अमृत की धारा से -

प्लावितं पुरुषं दृष्ट्वा चिन्तयित्वा समाहितः[८७]।
तेनामृतेन सम्पूर्णः साङ्गोपाङ्गकलेवरम्[८८]।।४४।।

(प्लावितं पुरुषं दृष्ट्वा समाहितः चिन्तयित्वा तेन अमृतेन सम्पूर्णः अङ्ग-उप-अङ्ग-कलेवरम्-)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

प्लावित पुरुष की कल्पना कर, एकाग्रचित्त से चिन्तन कर, उस अमृत से परिपूर्ण

साङ्गोपाङ्ग शरीरवाला -

अहमेव परं ब्रह्म परमात्माऽहमव्ययः[८९]।
एवं यद्वेदनं तच्च सगुणं ध्यानमुच्यते[९०]।।४५।।

(अहम् अव्ययः परमात्मा अहम् एव परंब्रह्म, एवं यत् वेदनं तत् च सगुणं ध्यानं उच्यते ।)

मैं, अव्यय परमात्मा और मैं ही परबह्म हूँ, इस प्रकार की निष्ठा को भी सगुण ध्यान कहते हैं ।

एवं ध्यानामृतं कुर्वन् षण्मासान्मृत्युजिद्‌भवेत्[९१]।
वत्सरान्मुक्त एव स्याज्जीवन्नेव न संशयः[९२]।।४६।।

(एवम् अमृतं ध्यानं कुर्वन् षट्-मासात् मृत्युजित् भवेत्। एवं वत्सरात् जीवन् एव मुक्तः स्यात् (इति) न संशयः ।)

इस प्रकार अमृतरूप ध्यान को करते हुए योगी छः मास में मृत्यु को जीतनेवाला होता है और एक वर्ष में जीवन-धारण करते हुए भी वह मुक्त है, इसमें संशय नहीं ।

जीवन्मुक्तस्य न क्वापि दुःखावाप्तिः कदाचन[९३]।
किं पुनर्नित्यमुक्तस्य तस्मान्मुक्तिर्हि दुर्लभा[९४]।।४७।।

(जीवन्-मुक्तस्य कदाचन न क्व अपि दुःख-अवाप्तिः किं पुनः नित्यमुक्तस्य, तस्मात् हि मुक्तिः दुर्लभा ।)

जीवन्मुक्त को कभी भी, कहीं से भी दुःख की प्राप्ति नहीं होती है । फिर जो नित्यमुक्त है-उसके लिए कहना ही क्या। इसीलिए मुक्ति को दुर्लभ कहा गया है ।

तस्मात्त्वमपि विप्रेन्द्र मुक्तये कुरु मद्वचः[९५]।
ज्ञानेन सह कर्माणि फलशून्यानि नित्यशः[९६]।।४८।।

(तस्मात् विप्रेन्द्र! त्वम् अपि मुक्तये मत्-वचः ज्ञानेन सह फल-शून्यानि कर्माणि नित्यशः कुरु ।)

इसलिए, हे विप्रेन्द्र, तुम भी मुक्ति के लिए मेरे कहे अनुसार ज्ञान के साथ निष्काम

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कर्मानुष्ठानों को सदैव करो।

अथवा मण्डले पश्येदादित्यस्य महाद्युतेः[९७]।
आत्मानं सर्वजगतः पुरुषं हेमरूपिणम्[९८]।।४९।।

(अथवा महाद्युतेः आदित्यस्य मण्डले पश्येत्, सर्वजगतः आत्मानं हेमरूपिणं पुरुषं -)

अथवा देदीप्यमान, सूर्यमण्डल में ध्यान से देखें - सम्पूर्ण जगत् के आत्मारूप, सुवर्ण-रूप पुरुष को -

हिरण्यश्मश्रुकेशं च हिरण्मयनखं हरिम्[९९]।
कल्पान्तानलवद्वर्णं सृष्टिस्थित्यन्तकारणम्[१००]।५०।।

(हिरम्यश्मश्रुकेशं हिरण्मय-नखं च कल्पान्त-अनलवत्-वर्णं सृष्टि-स्थिति-अन्तकारणं हरिम्-)

सुवर्ण-रूप दाढ़ी और केशवाले, सुवर्ण नखवाले, कल्पान्त (दृश्य जगत् के लय का समय) के अग्नि से समान वर्णवाले, सर्जन पालन और संहरण के कारण हरि को -

पद्मासनस्थितं सौम्यं प्रबुद्धाब्जनिभाननम्[१०१]।
पद्मोदरदलाभाक्षं सर्वलोकाभयप्रदम्[१०२]।।५१।।

(पद्मासनस्थितं सौम्यं प्रबुद्ध-अब्ज-निभ-आननं पद्म-उदर-दल आभा अक्षं सर्वलोक-अभयप्रदम्-)

पद्मासन में स्थित, सौम्य, जाग्रत कमल के समान मुखवाले, कमलमध्य के आभा के समान आँखवाले, सभी प्राणियों को अभय देने वाले -

विजानन्तं सदा सर्वानुन्नयन्तं च धार्मिकान्[१०३]।
सर्वरत्नसमाकीर्णं किरीटाद्यैर्विभूषितम्।।५२।।

(सदा सर्वान् विजानन्तं धार्मिकान् उन्नयन्तं च सर्वरत्न-समाकीर्णं किरीट-आद्यैः विभूषितम् -)

सदैव सभी वस्तुओं को जानने वाले, धार्मिकों को उठाने वाले, सभी रत्नों से व्याप्त, मुकुट आदि से विभूषित-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भासयन्तं जगत् सर्वं दृष्ट्वा लोकैकसाक्षिणम्[१०४] ।
सोऽहमात्मेति या बुद्धिः सा च ध्याने प्रशस्यते[१०५] ।।५३।।

(सर्वं जगत् भासयन्तं लोकैकसाक्षिणं दृष्ट्वा सः आत्मा अहम् इति या बुद्धिः सा च ध्याने प्रशस्यते ।)

सम्पूर्ण जगत् को प्रकाशित करनेवाले-ऐसे एकमात्र लोकसाक्षी को मन से देखकर-मैं वही हूँ ऐसी निष्ठा को ही ध्यान में प्रशस्त माना गया है ।

ध्यानमेव हि मोक्षस्य महामार्गस्तपोधन[१०६] ।।५४।।

(तपोधन, ध्यानम् एव हि मोक्षस्य महामार्गः ।)

हे तपोधन, ध्यान ही मोक्ष के लिए राजपथ है ।

ध्यानेनानेन सौरेण मुक्तिं यान्तीह सूरयः[१०७] ।
तस्मात् त्वमपि विप्रेन्द्र ध्यानमेव समाचर[१०८] ।।५५।।

(अनेन सौरेण ध्यानेन सूरयः इह मुक्तिं यान्ति । तस्मात् विप्रेन्द्र, त्वम् अपि ध्यानम् एव समाचर ।)

इसी सूर्यात्मक ध्यान से विद्वान् लोग इस संसार से मोक्षमार्ग को जाते हैं। इसीलिए हे विप्रेन्द्र, तुम भी ध्यान का ही आचरण करो ।

अन्यान्यपि बहून्याहुर्ध्यानानि मुनिसत्तम[१०९] ।
मुख्यान्येतानि चैतेभ्यो जघन्यानीतराणि च[११०] ।।५६।।

(मुनिसत्तम, अन्यानि अपि बहूनि ध्यानानि आहुः, एतेभ्यो च एतानि मुख्यानि, इतराणि च जघन्यानि ।)

हे मुनिश्रेष्ठ, और भी अनेक प्रकार के ध्यान कहे गए हैं, किन्तु उनमें ये मुख्य हैं और इनके अतिरिक्त निम्नकोटि के हैं ।

समाधिमधुना वक्ष्ये भवपाशविनाशनम्[१११] ।
भवपाशनिबद्धश्च यथावच्छ्रोतुमर्हसि[११२] ।।५७।।

(अधुना भव-पाशविनाशनं समाधिं वक्ष्ये भव-पाशनिबद्धः च (त्वं) यथावत् श्रोतुं अर्हसि ।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अब भवपाश को दूर करने वाली समाधि का वर्णन कहता हूँ। भवपाश में पड़े हुए होने के कारण तुम यथावत् सुनने के योग्य हो।

यमादिगुणसम्पन्नो जितवायुर्जितेन्द्रियः[११३]।
धारणाध्यानसंयुक्तः समाधिं कुरु पुत्रक[११४]।।५८।।

(पुत्रक ! यम-आदि-गुण-सम्पन्नः जितवायुः जितेन्द्रियः धारणा ध्यानं संयुक्तः समाधिं कुरु।)

हे पुत्र, यम आदि गुणों से युक्त हो, प्राण को वश में कर, इन्द्रियों को वश में कर, धारणा और ध्यान से युक्त होकर समाधि का अभ्यास करो।

समाधिः समतावस्था जीवात्मपरमात्मनोः[११५]।
परमात्मस्थितिः प्रोक्तो समाधिः प्रत्यगात्मनः[११६]।।५९।।

(जीवात्मपरमात्मनोः समतावस्था समाधिः। प्रत्यक् आत्मनः परमात्मस्थितिः समाधिः प्रोक्तः।)

जीवात्मा और परमात्मा की एकता ही समाधि है। वैयक्तिक आत्मा का परम-आत्मा के साथ एकाकार हो जाना समाधि कही गई है।

ध्यायन् यथा यथाऽऽत्मानं तत्समाधिस्तथा तथा[११७]।
ध्यानेनात्मनि संस्थाप्य नान्यथाऽऽत्मा यतो भवेत्[११८]।।६०।।

(यथा यथा ध्यायन् तथा तथा तत् समाधिः, ध्यानेन (परम) आत्मनि आत्मानं संस्थाप्य यतः आत्मा अन्यथा न भवेत्।)

जैसे-जैसे ध्यान चलता रहेगा, वैसे वैसे ही वह समाधि आती रहेगी। ध्यान से ही आत्मा को आत्मा में लगाना चाहिए, जिससे वह पृथक् न हो।

ध्यायन्नात्मानमानन्दं सत्यज्ञानमनन्तकम्[११९]।
ब्रह्म निर्गुणमत्रैव समाधिं समवाप्नुयात्[१२०]।।६१।।

(सत्यं, ज्ञानम्, अनन्तकम्, आनन्दं निर्गुणं ब्रह्म आत्मानं ध्यायन् अत्र एव समाधि समवाप्नुयात्।)

सत्य, ज्ञान, अनन्त और आनन्द-रूप निर्गुण-ब्रह्म का आत्मा में चिन्तन करने से उस स्थिति में ही समाधि लाभ होता है।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हृत्पद्मे परमात्मानं वासुदेवं सविग्रहम्[१२१]।
ध्यायन्नात्मानमत्रैव समाधिं समवाप्नुयात्[१२२]।।६२।।

(हृत्पद्मे आत्मानं सविग्रहं वासुदेवं परम्-आत्मानं ध्यायन् अत्र एव समाधिं समवाप्नुयात्।)

हृदयकमल के अन्दर आत्मा में शरीराकार वासुदेव परमात्मा का ध्यान करने से उस स्थिति में ही समाधि-लाभ होता है।

हृदयाम्बुजमध्यस्थं शिखातल्लीनमीश्वरम्[१२३]।
ध्यायन् वैश्वानरं तत्र समाधिं समवाप्नुयात्[१२४]।।६३।।

(हृदय-अम्बुज-मध्यस्थं शिखातल्लीनम् ईश्वरं वैश्वानरं ध्यायन् तत्र समाधिं समवाप्नुयात्।)

हृदयकमल के मध्य में स्थित शिखा-स्वरूप ज्योतिर्मय ईश्वर का ध्यान करने से वहां समाधि-लाभ होता है।

आत्मानं हृदयाब्जस्थममृताप्लुतदेहिनम्[१२५]।
ध्यायन् पुरुषमत्रैव समाधिं समवाप्नुयात्[१२६]।।६४।।

(हृदयअब्जस्थं अमृताप्लुतदेहिनम् आत्मानं पुरुषं ध्यायन् अत्र एव समाधिं समवाप्नुयात्।)

हृदयकमल में स्थित अमृत से प्लावित देह के स्वामी आत्मा का पुरुषाकार ध्यान करने से यहीं पर समाधि-लाभ होता है।

भ्रुवोर्मध्येऽप्यधीशानं स्वर्णपिङ्गलमीश्वरम्[१२७]।
ध्यायन्नात्मानमत्रैव समाधिं समवाप्नुयात्।।६५।।

(भ्रुवोः मध्ये अधीशानं स्वर्णपिङ्गलम् ईश्वरम् अपि आत्मानं ध्यायन् अत्र एव समाधिं समवाप्नुयात्।)

भौहों के मध्य में अधिष्ठित स्वर्ण के समान पीतवर्ण ईश्वर का भी आत्मा में ध्यान करने से यहीं पर समाधि लाभ होता है।

आदित्यमण्डलं देवं हिरण्मयतनुं हरिम्[१२८]।
ध्यायन्नात्मानमत्रैव समाधिं समवाप्नुयात्[१२९]।।६६।।

(आदित्यमण्डलं हिरण्मयतनुं देवं हरिम् आत्मानं ध्यायन् अत्र एव समाधिं समवाप्नुयात्।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूर्यमण्डलस्वरूप सुवर्णमय-शरीरवाले देवता-हरि का आत्मा में ध्यान करने से यहीं पर समाधि-लाभ होता है।

अष्टाङ्गात्मकमेतद्धि पवित्रं पापनाशनम्[१३०]।
ज्ञानं गुह्यतमं पुण्यं कीर्तितं ते तपोधन[१३१]।।६७।।

(तपोधन ! एतत् हि पवित्रं पापनाशनं पुण्यं गुह्यतमम् अष्टाङ्ग-आत्मकं ज्ञानं ते कीर्तितम् ।)

हे तपोधन, यह पवित्र, पापनाशक, पुण्यकारक, गूढ़ अष्टाङ्गात्मक-ज्ञान तुम्हें कहा।

ज्ञानेनैव सहैतेन नित्यकर्माणि कुर्वतः[१३२]।
निवृत्तफलसंगस्य मुक्तिस्तस्य करे स्थिता[१३३]।।६८।।

(एतेन ज्ञानेन सह एव निवृत्त-फलसंगस्य नित्यकर्माणि कुर्वतः तस्य करे मुक्तिः स्थिता ।)

इस ज्ञान के साथ ही फलासक्ति से रहित नित्यकर्मानुष्ठान करनेवाले साधक के हाथ में मुक्ति रखी हुई है ।

य इदं पठते नित्यं पुण्याख्यानमनन्यधीः[१३४]।
सर्वपापविनिर्मुक्तः सत्यज्ञानी भविष्यति[१३५]।।६९।।

(अनन्यधीः यः इदं पुण्य-आख्यानं नित्यं पठते (सः) सर्वपाप-विनिर्मुक्तः सत्यज्ञानी भविष्यति ।)

निश्चल बुद्धि से जो इस पुण्याख्यान को नित्य अध्ययन करेगा, वह सभी पापों से मुक्त होकर सत्य को जाननेवाला बनेगा ।

यस्त्वैतत् शृणुयान्नित्यं श्रद्धाभक्तिसमन्वितः[१३६]।
एकजन्मकृतं पापं दिनेनैकेन नश्यति[१३७]।।७०।।

(नित्यं श्रद्धाभक्तिसमन्वितः यः तु एतत् शृणुयात् (तस्य) एक जन्मकृतं पापं एकेन दिनेन नश्यति ।)

नित्य, श्रद्धा और भक्ति के साथ जो इसे श्रवण करेगा, उसका एक जन्म का किया हुआ पाप एक दिन में ही नष्ट हो जाएगा ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शृणुयाद्यः सकृद्वापि योगाख्यानमिदं परम्[१३८] ।
सम्यक् विचारयेदेव स च सर्वज्ञतामियात्[१३९] ।।७१।।

(इदं परं योग-आख्यानं यः सकृत् वा अपि शृणुयात्, सम्यक् विचारयेत् च, एव, स सर्वज्ञतां इयात् ।)

यह परम-योगाख्यान जो एक बार भी सुनेगा, और उस पर अच्छी तरह विचार करेगा, वह सर्वज्ञता को प्राप्त करेगा ।

अनुतिष्ठन्ति ये नित्यमेतज्ज्ञानसमन्विताः[१४०] ।
नित्यकर्मान्वितान् दृष्ट्वा देवाश्च प्रणमन्ति हि[१४१] ।।७२।।

(एतत् ज्ञान समन्विताः ये नित्यं अनुतिष्ठन्ति हि (तं) नित्यकर्मान्वितान् दृष्ट्वा देवाः च प्रणमन्ति ।)

इस ज्ञान से युक्त होकर जो सदा अनुष्ठान करते हैं, निश्चय ही ऐसे नित्य कर्मानुष्ठानियों को देखते ही देवता भी प्रणाम करते हैं ।

तस्माज्ज्ञानेन देहान्तं नित्यकर्म यथाविधि[१४२] ।
कर्त्तव्यं देहिना पुत्र मुक्तये भवभीरुणा[१४३] ।।७३।।

(तस्मात् पुत्र भवभीरुणा देहिना देहान्तं ज्ञानेन यथाविधि नित्यकर्म मुक्तये कर्त्तव्यम् ।)

इसलिए हे पुत्र, भवभीरु शरीरधारी को शरीरपात तक ज्ञान के साथ विधिपूर्वक नित्य-कर्मानुष्ठान, मुक्ति के लिए करना चाहिए ।

✷ इति वसिष्ठसंहितायां योगकाण्डे चतुर्थोऽध्यायः ।
इस प्रकार वसिष्ठसंहिता योगकाण्ड का
चतुर्थ अध्याय समाप्त हुआ ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पञ्चमोऽध्यायः

इत्युक्तो योगिना योगी वसिष्ठेन महात्मना[१]।
शक्तिः पुत्रो महाभागं पप्रच्छं पितरं पुनः[२]।।१।।

(महात्मना योगिना वसिष्ठेन इति उक्तः, योगी शक्तिः पुत्रः, महाभागं पितरं पुनः पप्रच्छ ।)

महात्मा योगी वसिष्ठ से ऐसा सुनकर, योगी शक्तिनामक पुत्र ने महाभाग-पिता को पुनः पूछा ।

शक्तिरुवाच[३]-

यद्यात्मा निर्गुणः शुद्धः सदानन्दोऽजरोऽमरः[४]।
संसृतिस्तात कस्य स्यात् क्षेत्रनाशे कुतः स्थितिः[५]।।२।।

शक्तिः उवाच-

(यदि आत्मा निर्गुणः शुद्धः सदा आनन्दः अजरः अमरः तदा) तात, संसृतिः कस्य, क्षेत्रनाशे कुतः स्थितिः स्यात् ।)

शक्ति ने कहा -

यदि आत्मा-निर्गुण, शुद्ध, सदा आनन्दस्वरूप, अजर, अमर है, तो हे पिता, जन्म-मरण किसका होता है । और देहान्त होने पर वह कहाँ रहता है ।

नाशकालः कथं तस्य ज्ञायते भगवन् यतः[६]।
यथावत् सर्वमेतन्मे वक्तुमर्हसि साम्प्रतम्[७]।।३।।

(यतः, तस्य नाशकालः कथं ज्ञायते सर्वं भगवन् एतत् यथावत् मे साम्प्रतं वक्तुं अर्हसि ।)

इसी प्रकार उसका अन्तकाल कैसे जाना जाता है ? हे भगवान ! यह सब यथावत् मुझे बताने में आप सक्षम हैं ।

वसिष्ठ उवाच-

तस्यैव नित्यशुद्धस्य सदानन्दमयात्मनः[९]।
अवच्छिन्नस्य जीवस्य संसृतिः कीर्त्यते बुधैः[१०]।।४।।

वसिष्ठ उवाच -

(तस्य एव नित्यशुद्धस्य सदा आनन्दमय आत्मनः अवच्छिन्नस्य जीवस्य बुधैः संसृतिः कीर्त्यते ।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसिष्ठ जी ने कहा - उसी नित्यशुद्ध आनन्दस्वरूप आत्मा को देहावच्छिन्न होने से जीव के नाम से जाना जाता है, और विद्वानों के अनुसार उसी का जन्म और मरण होता है।

एक एव हि भूतात्मा भूते भूते व्यवस्थितः[११]।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्।।५।।

(एक एव हि भूत-आत्मा भूते-भूते व्यवस्थितः (सन्) एकधा बहुधा चैव जल-चन्द्रवत् दृश्यते ।)

एक ही जीवात्मा प्रत्येक प्राणी में स्थित होकर कभी एक प्रकार से तथा कभी अनेक प्रकार से जल में चन्द्रबिम्ब के समान दिखाई देता है ।

भ्रान्त्यारूढः स एवात्मा जीवसंज्ञस्तथा भवेत्[१२]।
यतः क्षेत्रं विजानाति तस्मात् क्षेत्रज्ञ उच्यते[१३]।।६।।

(स एव आत्मा भ्रान्ति-आरूढः (सन्) जीवसंज्ञः भवेत् तथा यतः क्षेत्रं विजानाति तस्मात् क्षेत्रज्ञ उच्यते ।)

वही आत्मा भ्रान्ति ये युक्त होने पर जीव नाम से कहा जाता है और जब इसे क्षेत्र (शरीर) समझ लेता है तब क्षेत्रज्ञ कहा जाता है ।

क्षेत्रज्ञोऽयमिति प्रोक्तो भुङ्क्ते यश्च शुभाशुभम्[१४]।
भोग्यमाभ्यन्तरं बाह्यं सुखादि च घटादि च[१५]।।
भोगायतनदेहेऽस्मिन्निन्द्रियैर्भोगसाधनैः।।७।।

(अस्मिन् भोगायतन देहे भोगसाधनैः इन्द्रियैः सुख आदि च आभ्यन्तरं घट-आदि बाह्यं भोग्यं शुभ-अशुभं यः च भुङ्क्ते अयं क्षेत्रज्ञः इति प्रोक्तः ।)

इस भोगायतन शरीर में भोगसाधन इन्द्रियों के द्वारा सुखादि-रूप आभ्यन्तर और घटादि-रूप बाह्य भोग को शुभाशुभ रूप में जो भोगता है, वह क्षेत्रज्ञ नाम से जाना जाता है ।

भोक्ता भोग्यं च भुक्तिश्च भोगायतनमिन्द्रियम्[१६]।
एतानि पञ्च वस्तूनि षष्ठं वस्तु न विद्यते।।८।।

(भोक्ता-भोग्यं च भुक्तिः भोगायतनं च इन्द्रियम् एतानि पञ्च वस्तूनि विद्यते षष्ठं वस्तु न ।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भोक्ता, भोग्य, भोग, भोगायतन और इन्द्रिय ये पाँच ही वस्तु हैं, छठी चीज है ही नहीं।

तथाऽवस्थाश्चतस्रस्तु जाग्रत् स्वप्नसुषुप्तयः[१७]।
चतुर्थी तु तुरीयाऽऽख्या नास्त्यवस्था तु पञ्चमी[१८]।।९।।

(तथा अवस्थाः तु चतस्रः - जाग्रतः स्वप्न सुषुप्तयः, चतुर्थी तु तुरीया आख्या, पञ्चमी अवस्था तु न अस्ति।)

उसी प्रकार अवस्था भी चार हैं, जाग्रत्, स्वप्न, सुषुप्ति और चौथी तुरीया नाम की, पाँचवीं अवस्था है ही नहीं।

स्वप्नेऽपि बाह्यशून्यस्य भोक्तुर्भुक्तिः प्रकीर्तिता[१९]।।१०।।

(बाह्य-शून्यस्य अपि स्वप्ने भोक्तुः भुक्तिः प्रकीर्तिता।)

बाहरी वस्तु का अभाव होने पर भी स्वप्न में भोक्ता का भोग माना गया है।

सुषुप्तिः स्वात्मरूपेण निर्व्यापारेण संस्थितिः[२०]।
तुरीयाख्ये भवेदात्मा विनष्टो भवभावतः[२१]।।११।।

(स्व-आत्मरूपेण निः-व्यापारेण संस्थितिः सुषुप्तिः तुरीयाख्ये आत्मा भवभावतः विनष्टो भवेत्।)

आत्मा का निज-स्वरूप में व्यापाररहित रहना सुषुप्ति कही जाती है। तुरीय नामक अवस्था में आत्मा संसार के भाव से निर्मुक्त हो जाता है।

क्षेत्रनाशे स्थितिस्तस्य वायव्ये तैजसेऽपि वा[२२]।
सूक्ष्मे लिङ्गशरीरेऽस्मिन्नवच्छिन्नात्मनः सदा[२३]।।१२।।

(क्षेत्रनाशे सूक्ष्मे अस्मिन् लिङ्गशरीरे सदा अवच्छिन्नः तस्य आत्मनः वायव्ये तैजसे वा अपि स्थितिः।)

शरीरपात होने पर सूक्ष्म लिङ्गशरीर (कारणशरीर) में परिमित रूप से सदैव रहनेवाला आत्मा का वायुरूप अथवा तेजोरूप में वास होता है।

लिङ्गदेहेन सर्वत्र वर्तते जीवसंज्ञकः[२४]।
पुण्यपापवशाद्देहं तेनैवान्यं बिभर्ति च[२५]।।१३।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(जीवसंज्ञकः (सः) सर्वत्र लिङ्गदेहेन वर्तते च पुण्यपापवशात् तेन एव अन्यं देहं बिभर्ति ।)

जीव-नाम से वही आत्मा सर्वत्र लिङ्गदेह के साथ रहता है, और पुण्य पाप के कारण वही अन्य देह को धारण करता है ।

एवमेव भ्रमेज्जीवो यावत्कर्मपरिक्षयः[२६]।
कर्मक्षयादात्मशुद्धिः शुद्धेनैवात्मवेदनम्[२७]।।१४।।

(यावत् कर्मपरिक्षयः, एवमेव जीवः भ्रमेत् कर्मक्षयात् आत्म-शुद्धिः, शुद्धेन एव आत्मवेदनम्।)

कर्म के पूर्णतः क्षय होने तक जीव इसी प्रकार (जन्म-मृत्यु के चक्कर में) घूमता रहता है । कर्म का क्षय हो जाने पर आत्मशुद्धि होती है और इस शुद्धता से ही आत्मा का ज्ञान होता है ।

ध्यानयोगबलादेव भवेन्मुक्तिर्हि नान्यथा[२८]।
क्षेत्रस्य नाशकालस्तु ज्ञायते कालसूचकैः[२९]।।१५।।

(ध्यान-योग बलात् एव हि मुक्तिः भवेत् अन्यथा न, कालसूचकैः (एतैः) क्षेत्रस्य नाशकालः तु ज्ञायते ।)

ध्यानयोग के बल से ही मुक्ति हो सकती है अन्यथा नहीं, और इससे ही मृत्युसूचक लक्षण से शरीर का अन्तकाल भी जाना जाता है ।

चिह्नैराभ्यन्तरैर्बाह्यैर्ज्ञात्वा गच्छेद्यथारुचि[३०]।
यावत् क्षेत्री भवेत् तावत् साध्यं सर्वं प्रसाधयेत्[३१]।।१६।।

(आभ्यन्तरैः बाह्यैः चिह्नैः ज्ञात्वा यथारुचि गच्छेत्। यावत् क्षेत्री भवेत् तावत् साध्यं सर्वं प्रसाधयेत् ।)

आभ्यन्तर और बाह्य चिन्हों को जानकर यथारुचि चलना चाहिए और जबतक शरीर में जीव है तब तक सभी प्रकार का यत्न करना चाहिए ।

तन्नाशे कः समर्थः स्यात् क्षेत्रयोगो हि दुर्लभः[३२]।।१७।।

(तत् नाशे कः समर्थः स्यात् हि क्षेत्रयोगः दुर्लभः ।)

देहनाश होने पर कौन (यत्न करने में) समर्थ हो सकता है. क्योंकि शरीर मिलना ही दुर्लभ है ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भूतानां क्षेत्रिणः श्रेष्ठाः क्षेत्रिणां बुद्धिजीविनः[३३]।
बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः[३४]।
ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः[३५]।।१८।।

(भूतानां क्षेत्रिणः श्रेष्ठाः, क्षेत्रिणां बुद्धिजीविनः, बुद्धिमत्सु नराः श्रेष्ठाः, नरेषु ब्राह्मणाःस्मृताः, ब्राह्मणेषु च विद्वांसः, विद्वत्सु कृतबुद्धयः ।)

प्राणिमात्र में देहधारी श्रेष्ठ हैं। देहधारियों में बुद्धिजीवी तथा बुद्धिमानों में मनुष्य श्रेष्ठ हैं, मनुष्यों में ब्राह्मण, ब्राह्मणों में विद्वान् तथा विद्वानों में दृढ़ बुद्धिवाले श्रेष्ठ हैं -

कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवेदिनः[३६]।
ब्रह्मवित्सु परं किञ्चित् न श्रेष्ठमिह विद्यते[३७]।।१९।।

(कृतबुद्धिषु कर्तारः, कर्तृषु ब्रह्मवेदिनः (श्रेष्ठाः), ब्रह्मवित्सु परं श्रेष्ठं इह किञ्चित् न विद्यते ।)

दृढ़ बुद्धिवालों में क्रियावान्, क्रियावानों में ब्रह्मवित् श्रेष्ठ हैं और इस संसार में ब्रह्मवित् से दूसरा कोई श्रेष्ठ नहीं है ।

क्षेत्रवानेव विद्वांश्च कुर्यान्निःश्रेयसे द्विजः[३८]।
तेन कालोऽपि विज्ञेयश्चिह्नैर्बाह्यैस्तथान्तरैः[३९]।।२०।।

(क्षेत्रवान् विद्वान् द्विज एव च निःश्रेयसे कुर्यात् तेन बाह्यैः तथा अन्तरैः चिह्नैः कालः अपि विज्ञेयः ।)

शरीरधारी विद्वान् ब्राह्मण को मोक्ष के लिए यत्न करना चाहिए और उसके द्वारा बाहरी और भीतरी चिन्हों से काल (मृत्यु समय) को भी जानना चाहिए ।

मृत्युकालं च तैर्ज्ञात्वा मुक्तो गच्छेत् परां गतिम्[४०]।
तत्राभ्यन्तरचिह्नानि वायुचारवशात् शृणु[४१]।।२१।।

(तैः मृत्युकालं ज्ञात्वा च मुक्तः परां गतिं गच्छेत् तत्र वायु-चार-वशात् आभ्यन्तर चिह्नानि शृणु।)

उन चिह्नों से मृत्युकाल को जानकर और उससे छुटकारा पाकर परमगति को जाना चाहिए । अब उसमें वायुसंचार (श्वास-प्रश्वास) से उत्पन्न भीतरी चिह्नों को सुनो ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वायुश्चरति देहेस्मिंश्चन्द्रभास्करभागयोः[४२]**।**
बहिरन्तश्च सर्वेषां केषाञ्चिद्देहमध्यतः[४३]**।।२२।।**

(अस्मिन् देहे चन्द्र-भास्कर भागयोः सर्वेषां बहिः अन्तः वायुः चरति च केषाञ्चित् देहमध्यतः (चरति)।)

इस शरीर में बाहर तथा भीतर चन्द्र (बाएँ) और भास्कर (दाएँ) भाग में वायु संचरण करता रहता है, और किसी विरले का ही देह मध्य अर्थात सुषुम्णा से वायु संचरण करता है।

विषं भास्करभागे स्यात् सोमभागेऽमृतं तथा[४४] **।**
तयोः कालवशान्नित्यं चरतश्चन्द्रभास्करौ[४५]**।।२३।।**

(भास्करभागे विषं तथा सोमभागे अमृतं स्यात् कालवशात् तयोः नित्यं चन्द्रभास्करौ चरतः।)

वह वायु दाएँ भाग में विषरूप (बुरा) तथा बाएँ भाग में अमृतरूप (अच्छा) है। समय के प्रभाव से उन दोनों में नित्य शीततत्व तथा उष्णतत्व संचरण करते हैं।

सर्वे कालस्य वशगाः स्वतन्त्रः काल एव हि[४६]**।**
तस्माच्चिह्नैः सदा विन्द्याद्यथावत् कालमादितः[४७]**।।२४।।**

(सर्वे कालस्य वशगाः हि काल एव स्वतन्त्रः, तस्मात् चिह्नैः सदा आदितः कालं यथावत् विन्द्यात्।)

सभी काल के वश में हैं किन्तु एक मात्र काल ही स्वतन्त्र है। इसलिए चिह्नों के द्वारा सदा पहले से ही काल को यथावत् जानना चाहिए।

सव्ये च दक्षिणे चापि पार्श्वयोरुभयोरपि[४८]**।**
वायुः प्रवर्त्तते देहे श्वासरूपेण देहिनाम्[४९]**।।२५।।**

(देहिनां देहे सव्ये च दक्षिणे च अपि उभयोः पार्श्वयोः अपि वायुः श्वासरूपेण प्रवर्त्तते।)

शरीरधारियों के शरीर में बाएँ और दाएँ दोनों भाग से श्वास रूप से वायु चलता है।

श्वाससङ्ख्याभिरप्यत्र कालं कालविदो विदुः[५०]**।।२६।।**

(अत्र कालविदः श्वाससङ्ख्याभिः अपि कालं विदुः।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यहाँ काल को जानने वाले श्वासों की गणना के द्वारा भी मृत्यु को जान लेते हैं।

षष्टिश्वासो भवेत् प्राणः षट्प्राणा घटिका भवेत्[५१]।
घटिकाः पञ्च राशिः स्याद्राशिद्वादशकं दिनम्[५२]।
त्रिंशद्दिनानि मासः स्याद् द्वौ मासौ च ऋतुर्भवेत्[५३]।२७।।

(षष्टि श्वासःप्राणः भवेत्, षट् प्राणाः घटिका भवेत्, पञ्चघटिका राशिः स्यात्, द्वादशकं राशिः दिनं, त्रिंशत् दिनानि मासः स्यात् च द्वौ मासौ ऋतुः भवेत्।)

साठ श्वास का एक प्राण (समय की एक ईकाई) होता है। छः प्राण की घटिका (२४ मिनट) होती है। पाँच घटिका की एक राशि (दो घंटे) होती है, और १२ राशि का एक दिन होता है। तीस दिन का एक मास होता है और दो मास की एक ऋतु होती है।

ऋतुभिश्च त्रिभिर्विद्यादयने विषुवेऽपि च[५४]।
ऋतुभिः षड्भिरब्दः स्यात्तच्छतं त्वायुरुत्तमम्[५५]।।२८।।

(त्रिभिः ऋतुभिः विषुवे अपि च अयने विद्यात् षड्भि ऋतुभिः अब्दः स्यात् तत् शतं तु उत्तमं आयुः।)

तीन-तीन ऋतुओं से विषुव वृत्त के ऊपर दो अयन (उत्तरायण, दक्षिणायण) जानना चाहिए। छः ऋतु से एक वर्ष होता है तथा सौ वर्ष की आयु उत्तम मानी गई है।

ग्रहैः सार्धं प्रतिदिनं श्वासा द्वादशराशयः[५६]।
आविशन्ति तदेकस्य राशेः पञ्चैव नाडिकाः[५७]।।२९।।

(ग्रहैः सार्धं द्वादश राशयः प्रतिदिनं श्वासाः आविशन्ति। तत् एकस्य राशेः पञ्च नाडिका एव।)

ग्रहों के साथ बारह राशियों में प्रतिदिन श्वास चलता है तथा पाँच नाडियों (घटिका) की एक राशि होती है।

मेषश्च वृषभश्चैव मिथुनः कर्कटस्तथा[५८]।
सिंह कन्या तुला चैव वृश्चिकश्च धनुस्तथा[५९]।।३०।।
मकरश्चैव कुम्भश्च मीनश्चैते हि राशयः[६०]।
चरस्थिरोभयात्मानो मेषाद्या राशयः क्रमात्[६१]।।३१।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(मेषः च वृषभः च मिथुनः तथा कर्कटः एव सिंहः कन्या च तुला एव वृश्चिक तथा धनुः च मकरः च एव कुम्भकः च मीनः च हि राशयः एते मेषाद्या राशयः क्रमात् चरः स्थिरः उभयात्मनः।)

मेष, वृषभ, मिथुन, कर्क, सिंह, कन्या, तुला, वृश्चिक, धनु, मकर, कुम्भ और मीन इतनी राशियाँ हैं । ये मेष आदि राशियाँ क्रमशः चल, अचल तथा उभय स्वरूप वाली होती हैं ।

चरात्मकाश्च चत्वारो वामभागे वदन्ति ते[६२]**।**
स्थिरात्मकाश्च याम्येस्युरुभयत्रोभयात्मकाः[६३]**।।३२।।**

(ते चत्वारः चरात्मकाः च वामभागे वदन्ति स्थिरात्मकाः च याम्ये उभयात्मकाः उभयत्र स्युः ।)

इनमें से चार चर राशियाँ हैं और वे वाम भाग में कही जाती हैं । स्थिरात्मक (चार) राशियाँ दाहिने भाग में तथा उभयात्मक (चार) दोनों भागों में कही जाती हैं ।

भूतं भव्यं भविष्यच्च शुभाशुभफलं तथा[६४]**।**
राशिष्वेतेषु देहेऽस्मिन् विज्ञातव्यं ग्रहोदयात्[६५]**।।३३।।**

(एतेषु राशिषु ग्रह-उदयात् अस्मिन् शरीरे भूतं भव्यं भविष्यत् च तथा शुभ-अशुभ फलं ज्ञातव्यम् ।)

इन राशियों में ग्रहोदय के संयोग से इस शरीर में भूत, वर्तमान और भविष्य को तथा शुभ अशुभ फल को भी जानना चाहिए ।

(**टिप्पणी** - ऐसा माना जाता है कि मनुष्य के मन एवं शरीर की क्रियाप्रणाली इन स्वाभाविक परिवर्तनों के द्वारा प्रभावित तथा नियन्त्रित होती है ।)

एकैकस्मिन् भवन्त्यत्र राशौ भूतानि पञ्च च।
वायुर्वह्निस्तथा भूमिरापः खमिति पञ्च वै[६६]**।।३४।।**

(अस्मिन् एक-एक राशौ पञ्चभूतानि वायुः वह्निः तथा भूमिः आपः खं च इति वै पञ्च अत्र भवन्ति ।)

इनमें एक-एक राशि के अन्दर वायु, अग्नि, भूमि, जल और आकाश इन पाँच महाभूतों का वास है ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्वेषामपि राशीनां वायव्याद्या तु नाडिका[६७]।
द्वितीया नाडिकाऽऽग्नेयी तृतीया पार्थिवी मता[६८]।
चतुर्थी वारुणी ज्ञेया व्योमाख्या पञ्चमी स्मृता[६९]।।३५।।

(सर्वेषां राशीनामपि आद्या नाडिका तु वायवी, द्वितीया नाडिका आग्नेयी तृतीया पार्थिवी मता चतुर्थी वारुणी ज्ञेया व्योम आख्या पञ्चमी स्मृता ।)

सभी राशियों में आदि नाड़िका वायुतत्त्व वाली, दूसरी नाड़िका अग्नितत्त्व वाली, तीसरी पार्थिवतत्त्व वाली, चौथी जलतत्त्व वाली और पाँचवीं आकाशतत्त्व वाली मानी गई है ।

नासापार्श्वे वहेद्वायुर्वायव्यांशेषु राशिषु[७०] ।
आग्नेयांशे चरन्नूर्ध्वं पार्थिवस्तम्भपार्श्वतः[७१]।।३६।।

(वायवी अंशेषु राशिषु नासा पार्श्वे वायुः वहेत् आग्नेय-अंशे ऊर्ध्व-पार्थिव स्तम्भ पार्श्वतः चरन् ।)

राशियों के वायुतत्त्व वाले अंश में नाक के एक तरफ में वायु चलती है। राशियों के आग्वितत्त्व वाले अंश में ऊपर की ओर से तथा राशियों के पृथ्वीतत्त्व वाले अंश में दोनों ओर से चलती है ।

नासस्याधो वहेद्वायुर्वरुणांशोदयस्तथा[७२]।
नासामध्ये वहेद्व्योम्नि व्योमांशस्तु तदा भवेत्[७३]।।३७।।

(वरुण-अंश-उदयः वायुः नासस्य अधः वहेत् ता व्योम अंशः तु भवेत् तदा व्योम्नि नासामध्ये वहेत् ।)

जलतत्त्व के उदय होने पर वह वायु नासातल से चलती है तथा आकाशतत्त्व वाली जब होती है तब वह नाक के ठीक बीच के खाली स्थान से बहती है ।

गुरुराहू च वायव्ये चरतोऽग्नौ भृगुः कुजः[७४]।
भूम्यां बुधो रविर्ज्ञेयौ जले चन्द्रशनैश्चरौ[७५]।
आकाशे विग्रहं विन्द्यात् एवं सर्वेषु राशिषु[७६]।।३८।।

(गुरुः राहुः च वायव्ये चरतः अग्नौ भृगुः कुजः भूम्यां बुधः रविः ज्ञेयः जले चन्द्रः शनैश्चरः आकाशे विग्रहम् एवं सर्वेषु राशिषु विन्द्यात् ।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुरु और राहु उस वायु (श्वास प्रश्वास) के साथ वायुतत्व में चलते हैं। शुक्र और मंगल अग्नितत्त्व में, बुध और रवि भूमितत्त्व में, चन्द्र और शनि जलतत्त्व के साथ चलते हैं, तथा आकाशतत्त्व में कोई भी ग्रह साथ नहीं रहते । इसी प्रकार सभी राशियों में जानना चाहिए ।

पूर्वोदितास्तु सर्वत्र सौम्याः पापास्त्वनन्तराः[७७] ।।३९।।

(पूर्व-उदिताः तु सर्वत्र सौम्याः अनन्तराः तु पापाः ।)

पूर्व-पूर्व क्रम से उदित ग्रह सर्वत्र सौम्य तथा पश्चात् क्रम से उदित पापग्रह होते हैं ।

राहुः कुजो रविः सौरिरेते दक्षिणतः शुभाः[७८] ।
गुरुर्बुधो भृगुश्चन्द्र सव्ये सौम्याः शुभावहाः[७९] ।।४०।।

(राहुः कुजः रविः सौरिः एते दक्षिणतःशुभाः, गुरुः बुधः भृगुः चन्द्रः सव्ये सौम्याः शुभावहाः।)

राहु, मंगल, रवि और शनि, ये ग्रह नाक के दाहिने भाग से शुभकारक तथा गुरु, बुध, शुक्र और चंद्र नाक के बाएँ भाग से चलने पर सौम्य और शुभकारक होते हैं ।

पापास्तु शुभदाः सव्ये सौम्याः पापफलास्त्विमे[८०] ।
प्रवेशे शुभदाः सर्वे निर्गमेत्वशुभावहाः[८१] ।।४१।।

(इमे सव्ये पापाः शुभदाः सौम्या तु पापफलाः प्रवेशे सर्वे शुभदाः निर्गमे तु अशुभावहाः।)

बाएँ भाग से चलने पर पापग्रह भी शुभकारक तथा सौम्य ग्रह निश्चय ही अशुभकारक होते हैं । श्वास लेते समय सभी ग्रह शुभ तथा छोड़ते समय अशुभ होते हैं ।

एवं राशिस्थभूतेषु ग्रहोदयवशाद् बुधः[८२] ।
शुभाशुभं तदा ज्ञात्वा पृष्टः सर्वं वदेत्ततः[८३] ।।४२।।

(एवं राशिस्थ-भूतेषु ग्रहोदयवशात् बुधः शुभ-अशुभं ज्ञात्वा ततः पृष्टः (सन्) सर्वं तदा वदेत् ।)

इस प्रकार राशियों में स्थित पाँच महाभूत-तत्वों को ग्रहोदय के अनुसार जानकर तथा उसके शुभाशुभ फल को समझकर, तब किसी के पूछने पर उसी प्रकार सब कहना चाहिए ।

यत्र वायुस्थितिस्तत्र प्रष्टा चेच्छुभमादिशेत्[८४] ।
यत्र भागे मरुन्नास्ति तत्रस्थश्चेद् वृथा भवेत्[८५] ।।४३।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(यत्र वायुस्थितिः तत्र प्रष्टा चेत् शुभं आदिशेत्, यत्र भागे मरुत् न अस्ति तत्रस्थः चेत् वृथा भवेत्।)

नाक के जिस भाग से वायु चलती रहे, उस तरफ यदि प्रश्नकर्ता रहे तो शुभफल कहना चाहिए और जिस भाग से वायु नहीं चलती रहे, प्रश्नकर्ता के उधर रहने से व्यर्थ फल कहना चाहिए।

अग्रं दक्षिणमित्युक्तं पृष्ठं सव्यमितीरितम्[६]।।४४।।

(अग्रं दक्षिणं इति उक्तं पृष्ठं सव्यं इति ईरितम्।)

आगे को दाहिना तथा पीछे को बायाँ कहा गया है।

अग्रस्थो यदि चेत् प्रष्टा तस्य दक्षिणवत् फलम्[७]।
पृष्ठस्थितस्य तस्यापि सव्यवत् फलमुच्यते[८]।।४५।।

(प्रष्टा यदि अग्रस्थः चेत् तस्य दक्षिणवत् फलं, पृष्ठस्थितस्य तस्य अपि सव्यवत् फलं उच्यते।)

पूछने वाला यदि सामने से पूछे तो दाहिने के अनुसार फल कहना तथा पीछे की ओर से पूछने पर बाएँ के अनुसार फल कहना चाहिए।

भोजनं मैथुनं युद्धं धनसंग्रहणं तथा[९]।
कुर्यादेतानि कर्माणि वायौ दक्षिणतः स्थिते[१०]।।४६।।

(भोजनं मैथुनं युद्धं तथा धनसंग्रहणं एतानि कर्माणि वायौ दक्षिणतः स्थिते कुर्यात्।)

भोजन, मैथुन, युद्ध तथा धनसंग्रह ये सभी काम वायु के दाहिने भाग से चलते समय करना चाहिए।

यात्राविवाहकर्माणि शुभकार्याणि यानि च[११]।
तानि सर्वाणि कुर्वीत वायौ वामे व्यवस्थिते[१२]।।४७।।

(यात्रा विवाहकर्माणि च यानि शुभकार्याणि तानि सर्वाणि वायौ वामे व्यवस्थिते कुर्वीत।)

यात्रा, विवाहकर्म तथा और जितने भी शुभकर्म हैं वे सभी वायु के वाम भाग में चलते समय करने चाहिए।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वामेऽपि वायावग्नौ चेन्न कुर्याद् गमनं बुधः[९३]।
गच्छेद्यदि तदा मोहाद् ब्रह्मोऽपि न निवर्तते[९४]।।४८।।

(वामे वायौ अग्नौ अपि चेत् बुधः गमनं न कुर्यात् यदि मोहात् गच्छेत् तदा ब्रह्मा अपि न निवर्तते।)

बाएँ भाग से श्वास चलते समय वायु और अग्नितत्व भी हो तो विद्वान् को यात्रा नहीं करनी चाहिए। यदि हठ से यात्रा करे तो उसे ब्रह्मा भी नहीं बचा सकता है।

पार्थिवे वारुणांशे च गमनं सुखसाधनम्[९५]।
व्योमांशेऽपि न गन्तव्यं कदाचिदपि यत्नतः[९६]।।४९।।

(पार्थिवे वारुण-अंशे च गमनं सुखसाधनम्, व्योम-अंशे अपि कदाचित् यत्नतः अपि न गन्तव्यम्।)

पृथ्वी और जलतत्व के रहने पर गमन सुखकारक होता है और आकाशतत्व होने पर कभी भी यत्नपूर्वक गमन नहीं करना चाहिए।

दिवसस्याद्यराशौ च वायूदयविपर्यये[९७]।
चित्तक्षोभो भवेत्तेन कार्याभावश्च जायते[९८]।।५०।।

(दिवसस्य आद्य-राशौ च वायु-उदय-विपर्यये चित्तक्षोभः भवेत् तेन कार्य-अभावः च जायते।)

दिन के आदि राशि में वायु के उल्टा (अनियमित) चलने पर चित्तविक्षेप होगा और उससे उद्देश्य में सफलता नहीं मिलेगी।

द्वितीये चैव राशौ तु विपरीतोदयो यदि[९९]।
धनहानिश्च दुःखं च सद्य एव भविष्यति[१००]।।५१।।

(द्वितीये राशौ च एव यदि विपरीत उदयः तु सद्य एव धनहानिः च दुखं च भविष्यति।)

और दिन के द्वितीय राशि में भी श्वास यदि अनियमित चलती रहे तो तत्काल ही धन की हानि और दुःख प्राप्त होता है।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तृतीये चैव राशौ तु यात्रादुःखं भविष्यति[१०१]।
चतुर्थे धननाशः स्यात् पञ्चमे देशविभ्रमः[१०२]।।५२।।

(तृतीये राशौ च एव यात्रदुःखं भविष्यति, चतुर्थे धननाशः पञ्चमे देशविभ्रमः स्यात्।)

दिन की तीसरी राशि में श्वास अनियमित चले तो यात्रा दुःखदायक, चौथे में धन का नाश तथा पाँचवें में रास्ता भूलकर भटक जाना होता है।

षष्ठे च प्रत्यवायः स्यात् सप्तमे रोगसंभवः[१०३]।
अष्टमे मरणं विन्द्यान्नवमे बुद्धिनाशनम्[१०४]।।५३।।

(षष्ठे च प्रत्यवायः स्यात् सप्तमे रोगसंभवः अष्टमे मरणं नवमे बुद्धिनाशनं विन्द्यात्।)

छठे में कठिनाई, सातवें में रोग, आठवें में मृत्यु तथा नौवें में बुद्धि का नाश होता है, ऐसा जानो।

दशमे देहसंतापोऽपरस्मिन् मित्रनाशनम्[१०५]।
दिवसस्यान्त्यराशौ तु सर्वदुश्चरितं भवेत्[१०६]।।५४।।

(दशमे देहसंतापः अपरस्मिन् मित्रनाशनं दिवसस्य अन्त्यराशौ तु सर्व-दुश्चरितं भवेत्।)

दसवें में शारीरिक कष्ट, ग्यारहवें में मित्रनाश तथा दिन के अंतिम (बारहवीं) राशि में सब काम बिगड़ जाता है।

राशिष्वेतेषु भूतानां स्थानेष्वपि विपर्यये[१०७]।
सर्वभूतभयं विन्द्याद्राज्ञश्च दुरितं भवेत्[१०८]।।५५।।

(एतेषु राशिषु भूतानां स्थानेषु विपर्यये अपि सर्वभूतभयं विन्द्यात् राज्ञश्च दुरितं भवेत्।)

इन राशियों में पंचमहाभूतों के स्थानों और वायुसंचारों में विपरीतता होने पर सभी प्राणियों को भय तथा राजा को भी संताप होगा, ऐसा समझना चाहिए।

✵ इति वसिष्ठसंहितायां योगकाण्डे पञ्चमोऽध्यायः।

इस प्रकार वसिष्ठसंहिता योगकाण्ड का
पाँचवा अध्याय समाप्त हुआ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

षष्ठोऽध्यायः

शक्तिरुवाच[१]-

केनोपायेन भगवन् कालं तरति कालवित्[२]।
तदहं श्रोतुमिच्छामि यथावद् ब्रूहि मे प्रभो[३]।।१।।

(भगवन्! कालवित् केन उपायेन कालं तरति ? तत् अहं श्रोतुं इच्छामि। प्रभो ! यथावत् मे ब्रूहि ।)

शक्ति ने कहा -

हे भगवन्, मृत्यु को जाननेवाला योगी किस उपाय से मृत्यु से छुटकारा पा सकता है। वह मैं सुनना चाहता हूँ । हे प्रभो, यथावत् मुझे वताईये ।

एवं पृष्टः स भगवान् शक्तिना वेदवादिना[४]।
आत्मजं कृपयालोक्य विजयोपायमब्रवीत्[५]।।२।।

(वेदवादिना शक्तिना एवं पृष्टः स भगवान् आत्मजं कृपया आलोक्य विजय-उपायं अब्रवीत् ।)

वेदमार्ग अनुयायी शक्ति के द्वारा ऐसा पूछने पर भगवान् वसिष्ठ ने, अपने पुत्र (शक्ति) को कृपादृष्टि से देखकर विजय के उपाय को बताया ।

वसिष्ठ उवाच[६] -

विनिश्चित्यात्मनः कालं बाह्याभ्यन्तरलक्षणैः[७]।
निर्भयस्तु प्रसन्नात्मा निर्द्वन्द्वो विजितेन्द्रियः[८]।।३।।

(बाह्य-आभ्यन्तर-लक्षणैः आत्मनः कालं विनिश्चित्य तु निर्भयः प्रसन्न-आत्मा निर्द्वन्द्वः विजित-इन्द्रियः-)

वसिष्ठ जी ने कहा -

बाहरी और भीतरी लक्षणों से अपने मृत्यु काल को निश्चित रूप से जानकर उसे निर्भय, प्रसन्न, निर्द्वन्द्व हो और इन्द्रियों को वश में कर -

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुर्वन् विध्युक्तकर्माणि नित्यनैमित्तिकानि च[९]।
योगेन परमात्मानं गुहायां प्राप्य चेतसा[१०]।।४।।

(विधि-उक्त कर्माणि नित्यनैमित्तिकानि च कुर्वन् योगेन चेतसा गुहायां प्राप्य परमात्मानं (चिन्तयन्)-)

शास्त्रोक्त नित्यनैमित्तिक कर्मानुष्ठान करते हुए, योग के द्वारा चित्तवृत्ति से अन्तराकाश में पहुँचकर परमात्म चिन्तन करते हुए -

तारकेण जपेन्नित्यं जितासुः कामवर्जितः[११]।
जपेद्वा तारकं ब्रह्म निष्कामश्चाच्युतः पथात्[१२]।।५।।

(जितासुः कामवर्जितः नित्यं तारकेण जपेत् वा निष्कामः च पथात् अच्युतः तारकं ब्रह्म जपेत् ।)

प्राण को जीतकर कामनाओं से रहित हो, नित्य ओंकार का जप करना चाहिए, अथवा कामनाओं से रहित हो अपने मार्ग पर दृढ रहकर तारक ब्रह्म का जप करना चाहिए ।

स कालं तमतिक्रम्य दीर्घायुर्ब्रह्मविद्भवेत्[१३]।
इति ब्रह्मा मम प्राह संक्षेपात् प्रणवं पुरा[१४]।।६।।

(स तं कालं अतिक्रम्य दीर्घायुः ब्रह्मवित् भवेत् इति ब्रह्मा पुरा मम संक्षेपात् प्रणवं प्राह ।)

ऐसा योगी मृत्यु को पार कर दीर्घायु तथा ब्रह्मविद् होता है। ऐसा ब्रह्मा ने प्राचीन समय में मुझ से संक्षेप में ओंकार के विषय में कहा था ।

तदहं ते प्रवक्ष्यामि शृण पुत्र महामते[१५]।।७।।

(तत् ते अहं प्रवक्ष्यामि महामते पुत्र! शृणु।)

उसी ओंकार को मैं तुमसे कहता हूँ, हे बुद्धिमान पुत्र, सुनो ।

इदमग्रे सदेवासीत् सौम्य जन्मादिकारणम्[१६]।।८।।

(सौम्य! अग्रे इदं सत् एव जन्म-आदि-कारणम् आसीत् ।)

हे सौम्य, पहले पहल एकमात्र सत् ही था और वही जन्म आदि का कारण था ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कारणादभवद्बीजं चतुर्वर्णात्मकाक्षरम्[१७]।
तदेतदोमिति ब्रह्म ब्रह्मज्ञानैकसाधनम्[१८]।।९।।

(कारणात् चतुः-वर्णात्मक-अक्षरं बीजम् अभवत् । तत् एतत् ओम् ब्रह्म इति ब्रह्मज्ञान-एकसाधनम् ।)

उसी कारण से चार वर्णवाला अक्षरस्वरूप बीज का निर्माण हुआ। वही ओम् ब्रह्म है और ब्रह्मज्ञान का एक मात्र साधन है ।

येन पश्यन्ति विद्वांसः सर्वज्ञं परमामृतम्[१९]।
तदेतद् ब्रह्मभुवनं प्रणवे यत्र सूरयः[२०]।
प्रपश्यन्ति धिया नित्यं तत्ते वक्ष्यामि संश्रृणु[२१]।।१०।।

(येन विद्वांसः सर्वज्ञं परम-अमृतं पश्यन्ति । तत् एतत् ब्रह्मभुवनं सूरयः यत्र धिया नित्यं प्रणवे प्रपश्यन्ति तत् ते वक्ष्यामि संश्रृणु ।)

जिससे विद्वान् लोग सर्वज्ञ परम अमृततत्व को पहचानते हैं, वही यह ब्रह्म का स्थान है। उस स्थान को विद्वान लोग बुद्धि के द्वारा नित्य प्रणव में देखते हैं, वही मैं तुम्हें कहता हूँ, एकाग्रचित्त होकर सुनो ।

संहारसंज्ञकं चापि व्यञ्जनं चार्धमात्रिकम्[२२]।
बालसूर्यप्रतीकाशं सबिन्दुं च तदक्षरम्[२३]।।११।।

तदप्योङ्कारनिर्दिष्टं जितासुर्युक्तचेतसा[२४]।
हृज्ज्योतीयमकारान्ते बिन्दुरूपा प्रदृश्यते[२५]।।१२।।

(संहारसंज्ञकं च अपि अर्धमात्रिकं व्यञ्जनं च बालसूर्य प्रतीकाशं सबिन्दुं तत् अक्षरं च तत् अपि ओंकार-निर्दिष्टं, इयं हृत् ज्योतिः जितासुः युक्तचेतसा अकारान्ते बिन्दुरूपा प्रदृश्यते ।)

संहार नाम से भी आधी मात्रावाला व्यञ्जन (म्) बालसूर्य के कान्ति जैसा बिन्दुयुक्त वह अक्षर भी ओंकार कहा गया है । यह हृदयस्थित ज्योति प्राणजयी एवं युक्तचित्त वालों को अकारान्त में बिन्दुरूप से दिखाई देता है ।

बिन्दोरुपरि नादश्च शुद्धस्फटिकसन्निभः[२६]।
विशुद्धचेतसः शक्ते प्रकाशयति चेतसि[२७]।।१३।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(शक्ते! बिन्दोः उपरि शुद्ध-स्फटिक-सन्निभः नादः च विशुद्ध चेतसः चेतसि प्रकाशयति।)

हे शक्ते, बिन्दु के ऊपर शुद्ध स्फटिक के समान वह नाद निर्मलचित्त वाले के हृदय में भासमान होता है।

तस्मिन् विश्वाधिको रुद्रो महर्षिः कृष्णपिङ्गलः[२८]।
ऊर्ध्वरेता विरूपाक्षस्तिष्ठतीत्याहुरागमाः[२९]।
आगमान्तैकसम्बोध्यो रुद्र एव न चापरः[३०]।।१४।।

(तस्मिन् विश्व-अधिकः कृष्णपिङ्गलः ऊर्ध्वरेता विरूपाक्षः महर्षिः रुद्रः तिष्ठति इति आगमाः आहुः आगम-अन्त-एक संबोध्यः रुद्र एव न च अपरः।)

उसमें संसार से निर्मुक्त पीतावृत, नीलकान्तिवाला, ऊर्ध्वरेता विरूपाक्ष (विशिष्ट दृष्टि वाले) महर्षि रुद्र रहते हैं - ऐसा आगमों में कहा गया है। उपनिषदों का एक मात्र ज्ञेय वह रुद्र ही है, दूसरा कोई नहीं।

(**टिप्पणी** - ऊर्ध्वरेता से तात्पर्य है कि जिसने अपने वासनात्मक, विचारों पर नियन्त्रण कर अन्तःशक्ति को जाग्रत कर लिया है।

तमागमान्तसंबद्धममृतं कृष्णपिङ्गलम्[३१]।
तद्द्रष्टुमिच्छतः शक्ते दृष्टिरोंकार एव च[३२]।।१५।।

(आगमान्त-संबद्धं तम् कृष्णपिङ्गलम् अमृतं द्रष्टुं इच्छतः, हे शक्ते!, तत् दृष्टिः ओंकार एव च।)

उपनिषदों से ज्ञेय पीतावृत नील अमृततत्व को देखने की इच्छा वाले के लिए हे शक्ते! वह ओंकार ही एकमात्र साधन है।

ओङ्कारो वाचकस्तस्य वाच्यो रुद्रोऽमृताक्षरः[३३]।
इति वेदावसानज्ञः स्वयम्भूः प्राह धर्मदृक्[३४]।।१६।।

(तस्य वाचकः ओंकारः अमृतः अक्षरः रुद्रः वाच्यः इति वेद-अवसानज्ञः धर्मदृक् स्वयंभूः प्राह।)

उसका वाचक ओंकार है तथा मर्त्य तथा क्षरस्वरूप से परे रहनेवाला रुद्र वाच्य है - ऐसा वेदान्तज्ञ धर्मद्रष्टा ब्रह्मदेव ने कहा था।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

साङ्ख्यादयोऽपि विद्वांसः सदा प्रणवसंस्थिताः[३५]।
नादोपरि महादेवं पश्यन्ति ज्ञानचक्षुषा[३६]।।१७।।

(साङ्ख्यादयः विद्वांसः अपि सदा प्रणव-संस्थिताः नाद-उपरि महादेवं ज्ञानचक्षुषा पश्यन्ति।)

सांख्य आदि के विद्वान लोग भी सदैव ओंकार में स्थित होकर नाद के ऊपर उस महादेव को ज्ञानदृष्टि से देखते हैं।

श्लाघ्या व्यासादयोप्येतैर्विशुद्धाः प्रणवाक्षरैः[३७]।
चेतसा संप्रपश्यन्ति नादान्ते वृषभध्वजम्।।१८।।

(श्लाघ्याः व्यासादयः अपि एतैः विशुद्धाः प्रणव-अक्षरैः चेतसा नादान्ते वृषभध्वजं संप्रपश्यन्ति।)

प्रशंसनीय व्यास आदि भी इस पवित्र ओंकार के द्वारा बुद्धि से नाद के अन्त में रुद्र को देखते हैं।

संसारपाशबद्धानां योगिनामप्ययोगिनाम्[३८]।
नान्यत् पश्यामि भैषज्यं मृत्योस्त्रैयंबकादृते[३९]।।१९।।

(संसार-पाश-बद्धानां योगिनाम् अयोगिनाम् अपि त्रैयम्बकात् ऋते मृत्योः भैषज्यं न अन्यत् पश्यामि ।)

गृहस्थों, योगियों तथा अयोगियों के लिए भी इस रुद्र के सिवा मृत्यु से छूटने के लिए दूसरा कोई उपाय नहीं देखता हूँ ।

तामागमान्तात् संसिद्धममृतं कृष्णपिङ्गलम्[४०]।
ओङ्कारं मूर्ध्नि निक्षिप्तं ध्यायन् यः प्रणवं जपेत्[४१]।।२०।।

(आगमान्तात् संसिद्धं मूर्ध्नि निक्षिप्तं कृष्ण-पिङ्गलं तम् अमृतम् ओंकारं ध्यायन् यः प्रणवं जपेत् ।)

उपनिषदों से प्रशंसित, मस्तक में स्थित, उस पीतावृत, नील अमृततत्व ओंकार का ध्यान करते हुए जो प्रणव का जप करता है -

तस्यात्मनि महादेवः प्रकाशयति सन्ततम्[४२]।
किं चात्मा योगिनां साक्षान्महादेवो हृदि स्थितः[४३]।।२१।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(तस्य आत्मनि महादेवः सन्ततं प्रकाशयति किम् च आत्मा योगिनां हृदि साक्षात् महादेवः स्थितः।)

उसके आत्मा में महादेव सतत् प्रकाश देते हैं, और आत्मा ही क्या बल्कि उन योगियों के हृदय में साक्षात महादेव रुद्र ही वास करते हैं ।

ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक्[४४]।
सुप्रीतो भगवान् रुद्रो रुद्रकोटिभिरावृतः[४५]।।२२।।

(सर्वस्य जगतः ईशः प्रभुः विश्वभुक् सुप्रीतः रुद्र कोटिभिः आवृतः भगवान् रुद्रः प्रीणाति।)

सभी जगत् के स्वामी प्रभु, संसार का भोग करने वाले, सुप्रसन्न, अनेक रुद्रों से घिरे हुए भगवान् रुद्र प्रसन्न रहते हैं -

ओङ्कारस्त्वयमागत्य युक्तचित्तस्य सन्निधौ[४६]।
तिष्ठतीति यतस्तस्मिंस्त्वं चैवं पश्य मूर्धनि[४७]।।२३।।

(ओङ्कारस्तु अयं युक्तचित्तस्य संन्निधौ आगत्य तिष्ठति इति। यतः तस्मिन् त्वं च एवं मूर्धनि पश्य।)

और ओंकार के रूप में युक्तचित्त योगी के समीप आकर रहते हैं। इसलिए तुम भी मस्तक के अंदर वैसा देखो।

इति मे ब्रह्मणः कोशं कोशस्थं परमामृतम्[४८]।
विधाय विधिवन्न्यासमृषिच्छन्दश्च दैवतम्[४९]।
विनियोगं तु विश्वात्मा योगनिष्ठोऽभवत्स्वयम्[५०]।।२४।।

(इति विश्वात्मा मे ब्रह्मणः कोशं कोशस्थं परम-अमृतं विधाय न्यासं ऋषिः छन्दः दैवतं च विधिवत् विनियोगं विधाय तु स्वयं योगनिष्ठः अभवत्।)

इस प्रकार विश्वात्मा ब्रह्मदेव ने मुझसे ब्रह्म के कोश को, कोशस्थित परम अमृत तत्व को, न्यास-ऋषि-छंद और देवता को विधिवत् बताकर तथा इनके विनियोग को भी बताकर स्वयं योग में स्थित हो गए।

त्वं चोक्तेन विधानेन गायत्र्या प्रणवेन वा[५१]।
प्राणसंयमनं कृत्वा पूर्वमात्मविशुद्धये[५२]।।२५।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(त्वं च उक्तेन विधानेन गायत्र्या वा प्रणवेन पूर्वं आत्मविशुद्धये प्राणसंयमनं कृत्वा-)

तुम भी इस उक्त विधान से गायत्री या प्रणव मंत्र के द्वारा पहले आत्मविशुद्धि के लिए प्राण का संयम कर -

विशुद्धचेताश्चोङ्कारकायस्थं परमामृतम्[५३]।
विज्ञाय स्वशरीरेऽस्मिन् विन्यस्योङ्कारमक्षरम्[५४]।।२६।।

(विशुद्धचेताः कायस्थम् ओंकार परम-अमृतं च विज्ञाय अस्मिन् ओंकार-अक्षरं स्व-शरीरे विन्यस्य (तिष्ठ)।)

निर्मल चित्त हो, शरीर में स्थित ओंकार रूपी परमतत्व को जानकर, उस ओंकार अक्षर का अपने शरीर में न्यास करो।

न्यस्तमन्त्रतनुर्धीरः सितभस्मावगुण्ठनः[५५]।
जितासुरेव कार्याणि स्वे स्वे संहत्य कारणे[५६]।
विष्णोः पदे च परमे चतुर्भिश्च समन्विते[५७]।।२७।।

(न्यस्तमन्त्रतनुः सितभस्मावगुण्ठनः धीरः जितासुः एव चतुर्भिः च समन्विते विष्णोः परमे पदे कारणे च स्वे स्वे कार्याणि संहत्य (तिष्ठति) ।)

उक्त मंत्र से न्यास किए हुए, शुभ्र भस्म लगाए हुए, धीर योगी, प्राण को वश में करके ही चारों अवस्थाओं (जाग्रत, स्वप्न, सुषुप्ति और तुरीय) से परिपूर्ण विष्णु के परम पद रूपी कारण में अपने सभी कार्यों का उपसंहार कर देते हैं ।

चित्तं निधाय योगेन देहेऽस्मिन् ब्रह्मणः पुरे[५८]।
गुहायां तु स्थितं रुद्रं परमानन्दविग्रहम्[५९]।
गुहायां यदि निष्कामो जन्म नेच्छति चेत् पुनः[६०]।।२८।।

(अस्मिन् देहे ब्रह्मणः पुरे परमानन्द-विग्रहं गुहायां तु स्थितं रुद्रं योगेन चित्तं निधाय (तिष्ठति)। यदि जन्म न इच्छति चेत् निष्कामः (योगेन) गुहायां (चित्तं) पुनः (निधाय)।)

ब्रह्म के वास स्थानरूपी इस शरीर में परमानन्द विग्रह रूप, गुहा में स्थित, रुद्र को, योग के द्वारा चित्त में लगाना चाहिए। यदि पुनर्जन्म की इच्छा न हो तो निष्काम होकर हृदय गुहा में (पूर्वोक्त रीति से) योग के द्वारा चित्त को लगाना चाहिए ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यस्त्वेनं परमात्मानं परमानन्दविग्रहम्[६१]।
गुहाप्रविष्टममृतं तारकेण जपेत् सदा[६२]।
स कालं समतिक्रम्य दीर्घायुर्ब्रह्मविद्भवेत्[६३]।।२९।।

(यः तु एनं परनानन्द-विग्रहम् अमृतं गुहाप्रविष्टं परमात्मानं तारकेण सदा जपेत् सः कालं समतिक्रम्य दीर्घायुः ब्रह्मवित् भवेत्।)

जो इस परमानन्द विग्रह अमृतरूप हृदय में स्थित परमात्मा को ओंकार के द्वारा सदा जप करता है, वह मृत्यु को पार कर दीर्घायु तथा ब्रह्मज्ञ होता है।

प्रणवं व्याहरन् वाचा यस्त्यजेत् कायमात्मनः[६४]।
ब्रह्मैवासौ भवेत्तस्मात् कालजित् सोऽपि पुत्रक[६५]।।३०।।

(वाचा प्रणवं व्याहरन् यः आत्मनः कायं त्यजेत् असौ ब्रह्म एव भवेत्। तस्मात् पुत्रक! सः अपि कालजित् (भवति)।)

वाणी (वैखरी) से प्रणव का उच्चारण करते हुए जो अपना शरीर छोड़ता है, वह ब्रह्म ही हो जाता है। इसीलिए हे पुत्र, वह भी मृत्युजित् हो जाता है।

एवं चापि जयोपायः कालस्य मुनिसत्तम[६६]।।३१।।

(मुनिसत्तम! कालस्य जय-उपायः एवं च अपि।)

हे मुनिश्रेष्ठ, मृत्यु को जीतने का उपाय एक दूसरा ऐसा भी है।

हृत्पद्मेऽष्टदलोपेते कन्दमध्यात्समुत्थिते[६७]।
द्वादशाङ्गुलनालेऽस्मिंश्चतुरङ्गुलवन्मुखे[६८]।।३२।।

प्राणायामैर्विकसिते केसरान्वितकर्णिके[६९]।
सुधारसं विमुञ्चद्भिः शशिरश्मिभिरावृते[७०]।।३३।।

(कन्दमध्यात् समुत्थिते द्वादश-अङ्गुल-नाले-चतुरङ्गुलवत्-मुखे प्राणायामैः विकसिते केसरान्वित-कर्णिके अस्मिन् अष्टदलोपेते हृत्-पद्मे शशिरश्मिभिः आवृते सुधारसं विमुञ्चद्भिः-)

कन्दमध्य से निकला हुआ, बारह अंगुल ऊँचा नाल, चार अंगुल मुखवाला, प्राणायाम के द्वारा विकसित केसरयुक्त कर्णिकावाला, इस अष्टदलयुक्त हृदयकमल में, चन्द्रकिरणावृत अमृतरस को छोड़ता हुआ -

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्[७१]।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपं सदाशिवम्[७२]।।३४।।

(पुरुषं परं ब्रह्म ऋतं सत्यं कृष्ण-पिङ्गलं ऊर्ध्वरेतं विरूपाक्षं विश्वरूपं सदाशिवम् -)

उस पुरुषाकार परमब्रह्म को - जो भीतर बाहर दोनों में यथार्थ रूप है, पीतावृत नील कांतिमान्, ऊर्ध्वरेता, त्रिनेत्रधारी, सबमें व्याप्त, सदाशिव -

पञ्चवक्त्रं महादेवं दशबाहुं त्रिलोचनम्।
शुद्धस्फटिकसंकाशं सर्वभूतहृदिस्थितम्[७३]।।३५।।

(पञ्चवक्त्रं महादेवं दशबाहुं त्रिलोचनं शुद्धस्फटिकसंकाशं सर्वभूतहृदि स्थितम् -)

पंचमुख, महादेव, दशबाहु, तीन रश्मिवाला, शुद्ध स्फटिक के समान कांतिमान् सभी जीवों के हृदय में स्थित -

षोडशच्छदसंयुक्तं शिरःपद्मादधोमुखात्[७४]।
निर्गतामृतधाराभिः सहस्राभिः समन्ततः।
प्लावितं पुरुषं तत्र चिन्तयेत् सुसमाहितः[७५]।।३६।।

(शिरःपद्मात् अधोमुखात् षोडश-छद-संयुक्तं निर्गतामृत-सहस्राभिः धाराभिः समन्ततः तत्र पुरुषं प्लावितं सुसमाहितः·चिन्तयेत्।)

शिरपद्म से नीचे सोलहदलवाला, अनेक स्थानों से निर्मल हजारों अमृतधारा से जो प्लावित है, उस पुरुषाकार के रूप में एकाग्रचित्त से चिंतन करना चाहिए।

त्र्यम्बकेति निष्कामो ज़पेदप्रच्युतः पथात्[७६]।
एवं वा हृदयाम्भोजे केसरान्वितकर्णिके[७७]।।३७।।

(एवं अप्रच्युतः पथात् निष्कामः त्र्यम्बक इति जपेत् वा केसरान्वित कर्णिके हृदयाम्भोजे -)

इस प्रकार अपने मार्ग में डटे हुए निष्काम भाव से त्र्यंबक मंत्र का जप करना चाहिए, अथवा केसर कर्णिकायुक्त हृदयकमल में -

वह्न्यादित्यशशाङ्कानां मण्डलैश्च समन्विते[७८]।
सुधारसं विमुञ्चद्भिः शशिरश्मिभिरावृते[७९]।।३८।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(वह्नि-आदित्य-शशांकानां मण्डलैः च समन्विते शशि-रश्मिभिः आवृते सुधारसं विमुञ्चद्भिः)

अग्नि, सूर्य और चन्द्रमणडल से जुड़े हुए, चन्द्रकिरणों से आवृत्त, अमृतरस को छोड़ते हुए -

उमाऽर्द्धदेहं वरदं कारणत्रयमीश्वरम्[८०]।
त्र्यम्बकमुदाराङ्गं चतुर्बाहुं त्रिलोचनम्[८१]।।३९।।

(उमा अर्द्धदेहं वरदं कारणत्रयम् ईश्वरं त्र्यंबकम् उदार अङ्गं चतुर्बाहुं त्रिलोचनम्-)

अर्द्धनारीश्वर, अभयदाता, स्थूल, सूक्ष्म और अव्यक्तकारणरूप, ईश्वर, त्र्यंबक, विशाल अंगवाला, चतुर्बाहु, तीन रश्मिवाला-

शुद्धस्फटिकसंकाशं सर्वलोकाभयप्रदम्।
अमृतेनाभिषिक्ताङ्गं परमानन्दविग्रहम्[८२]।।४०।।

(शुद्ध-स्फटिकसंकाशं सर्वलोक-अभयप्रदं अमृतेन अभिषिक्त-अंङ्गं परमानन्द-विग्रहं-)

शुद्ध स्फटिक के समान, कान्तिमान सभी जीवों को अभय देनेवाला, अमृत से पूर्ण अंगवाला, परमानन्द मूर्तिस्वरूप को -

त्र्यम्बकेन विधानेन यजेदात्मनि चेतसा[८३]।
जपेद्वा नित्यकर्माणि कुर्वन्नैमित्तिकानि च[८४]।।४१।।

(त्र्यंबकेन विधानेन आत्मनि चेतसा यजेत् वा नित्यनैमित्तिकानि च कर्माणि कुर्वन् (जपेत्)।)

त्र्यंबक मंत्र के विधान से अपने हृदय में जप करें, अथवा नित्यनैमित्तिक कर्मानुष्ठानों का आचरण करते हुए भी जप करें।

मृतसंजीवनीं तात रुद्रमेवात्मनि स्मरेत्[८५] ।।४२।।

(तात! (इदं) मृतसंजीवनीम् एवं रुद्रम् आत्मनि स्मरेत्।)

हे पुत्र! यह विधि मृतसंजीवनी है, अतः रुद्र को अपने में स्मरण करना चाहिए।

यस्तु विश्वात्मकं रुद्रं परमानन्दविग्रहम्[८६] ।
त्र्यम्बकेत्यृचा चान्यैर्यजेत् स्वात्मनि संस्थितम्[८७] ।
आत्मयाजी भवेत् सोऽपि सम्यग्विद्वद्भिरीरितम्[८८] ।।४३।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(यः तु त्र्यम्बक इति ऋचा अन्यैः च स्वात्मनि संस्थितं विश्वात्मकं परमानन्द-विग्रहं रुद्रं यजेत् सः अपि आत्मयाजी भवेत् इति सम्यक् विद्वद्भिः ईरितम् ।)

जो त्र्यंबक ऋचा से या अन्य ऋचाओं से अपनी आत्मा में स्थित विश्वात्मक मूर्तिमान परमानन्दरूप रुद्र का यजन करता है वह भी आत्मा का उपासक होता है । ऐसा यथार्थ वेदवेत्ताओं ने कहा है ।

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि[९] ।
संपश्यन्नात्मयाजी स्यादिति स्वायंभुवोऽब्रवीत्[१०] ।।४४।।

(सर्वभूतेषु च आत्मानम् आत्मनि च सर्वभूतानि सम्पश्यन् आत्मयाजी स्यात् इति स्वायम्भुवः अब्रवीत् ।)

जीवमात्र में अपने को, और अपने में जीवमात्र को जो देखता है, वह आत्मा का उपासक होता है, ऐसा ब्रह्मदेव ने कहा था ।

आत्मस्थं परमात्मानं परमानन्दविग्रहम् ।
विशुद्धचेतसा नित्यं यः पश्यति स पश्यति[११] ।।४५।।

(आत्मस्थं परमानन्द-विग्रहं परमात्मानं विशुद्धचेतसा यः नित्यं पश्यति स पश्यति ।)

अपने में स्थित मूर्तिमान परमानन्दस्वरूप परमात्मा को निर्मल चित्त से जो नित्य देखता है, वही वास्तविक द्रष्टा है ।

सर्वभूतस्थमात्मानं परमानन्दविग्रहम्[१२] ।
स्वात्मन्यवस्थितं वापि यः पश्यति स पश्यति[१३] ।।४६।।

(वा सर्वभूतस्थं परमानन्द-विग्रहम् आत्मानं स्वात्मनि अवस्थितम् अपि यः पश्यति स पश्यति ।)

अथवा सभी जीवों में स्थित मूर्तिमान परमानन्दस्वरूप आत्मा को अपने आत्मा में स्थित जो देखता है, वही वास्तविक द्रष्टा है ।

आत्मदेहस्थमुत्सृज्य बहिःस्थं यजते यदा[१४] ।
हस्तस्थं रत्नमुत्सृज्य सोऽन्यदर्जितुमिच्छति[१५] ।।४७।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(आत्मदेहस्थम उत्सृज्य (यः) बहिःस्थं यदा यजते सः हस्तस्थं रत्नम् उत्सृज्य अन्यत् अर्जितुम इच्छति ।)

अपने शरीर में स्थित को छोड़कर जो बाहरी की उपासना करता है, वह हाथ में रखे हुए रत्न को छोड़कर दूसरे को पाने की इच्छा करता है ।

तस्मात् स्वात्मानमद्वैतं परमानन्दविग्रहम्[९६]।
सोऽहमोमितिमन्त्रेण यजन्मृत्युञ्जयो भवेत्[९७]।।४८।।

(तस्मात् परमानन्दविग्रहं स्वात्मानं अद्वैतं सोऽहमोम् इति मन्त्रेण यजन् मृत्युञ्जयः भवेत्।)

इसलिए परमानन्दस्वरूप एकमेव अपने आत्मा का, 'सोऽहमोम्' इस मंत्र से जो उपासना करता है वह मृत्युंजय होता है।

यस्तु स्वात्मन्यशक्तश्चेद्यजेद्बाह्येषु सर्वदा[९८]।
स्वयमुत्पन्नलिङ्गेऽपि स्थापिते वा विशेषतः[९९]।।४९।।

(यः तु स्वात्मनि अशक्तः चेत् सर्वदा बाह्येषु विशेषतः स्वयम् उत्पन्न-लिङ्गे वा स्थापिते अपि यजेत् ।)

जो अपने हृदय में ऐसी उपासना करने में असमर्थ हों तो सदा बाहरी उपासना विशेषतः स्वयंभू लिंग में अथवा स्थापित लिङ्ग में नित्य करें ।

त्र्यम्बकेत्यृचा वाऽन्यैर्यजेद्यस्तु सदाशिवम्[१००]।
तस्य विश्वाधिको रुद्रो महर्षिः कृष्णपिङ्गलः[१०१]।
ऊर्ध्वरेता विरूपाक्षः प्रकाशयति चेतसि[१०२]।।५०।।

(त्र्यम्बक इति ऋचा वा अन्यैः यः तु सदाशिवं यजेत् तस्य चेतसि विश्वाधिकः कृष्णपिङ्गलः ऊर्ध्वरेता, विरूपाक्षः महर्षिः रुद्रः प्रकाशयति ।)

त्र्यंबक इस ऋचा से अथवा अन्य ऋचा से जो सदाशिव की उपासना करता है, उसके हृदय में विश्व से परे पीतावृत नीलकांतिवाले ऊर्ध्वरेता त्रिनेत्र महर्षि रुद्र प्रकाशित होते हैं ।

मृत्युभीतस्त्वशुद्धोऽपि सर्वावस्थासु सर्वदा[१०३]।
सर्वावस्थस्तु सर्वत्र मृतसंजीवनीं जपेत्[१०४]।।५१।।

(मृत्युभीतः तु अशुद्धः अपि सर्वावस्थासु सर्वदा सर्वत्र सर्वावस्थः तु मृतसंजीविनीं जपेत् ।)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मृत्यु से भयभीत सामान्य व्यक्ति भी सभी अवस्थाओं में सदा, किसी भी स्थिति में, सर्वत्र, मृतसंजीविनी (त्र्यंबक) मंत्र का जप करे ।

संसारपाशबद्धानां नराणां मोक्षकाङ्क्षिणाम्[१०५] ।
नान्यत् पश्यामि भैषज्यं मृत्योस्त्रैयम्बकादृते[१०६] ।।५२।।

(संसारपाशबद्धानां मोक्षकाङ्क्षिणां नराणां त्रैयम्बकात् ऋते मृत्योः भैषज्यं अन्यत् न पश्यामि।)

संसारपाश में जकड़े हुए किंतु मोक्ष की इच्छा रखनेवाले मनुष्यों के लिए त्र्यंबक के सिवाय मृत्यु से छूटने का दूसरा कोई उपाय नहीं दिखाई देता।

एवं वा विजयोपायः कालस्य मुनिसत्तम[१०७] ।।५३।।

(मुनिसत्तम! एवं वा कालस्य विजयोपायः।)

हे मुनिश्रेष्ठ! और ऐसा ही दूसरा उपाय मृत्यु को जीतने का है।

नारायणं जगन्नाथं वासुदेवमजं हरिम्[१०८] ।
चतुर्भुजमुदाराङ्गं शङ्खचक्रगदाधरम्[१०९] ।।५४।।

(नारायणं जगन्नाथं, वासुदेवम् अजं चतुर्भुजम् उदार-अङ्गं शङ्ख-चक्र-गदाधरं हरिम् -)

नारायण, जगन्नाथ, वासुदेव, अज, चतुर्भुज, विशाल अंगवाले, शंखचक्रगदाधारी हरि -

किरीटकेयूरधरं पद्मपत्रनिभेक्षणम्[११०] ।
पद्मोदरदलाभोष्ठं सर्वलोकाभयप्रदम्[१११] ।।५५।।

(किरीटकेयूरधरं पद्मपत्रनिभेक्षणं पद्मोदरदलाभोष्ठं सर्वलोक-अभयप्रदं (हरिं) -)

मुकुटकेयूरधारी पद्मपत्र के समान आँखवाले, कमलमध्य की कांति के समान ओंठवाले, सभी लोगों को अभयदेने वाले हरि का -

स्मरन् ब्रह्मपुरे त्वस्मिन् हृत्सरोरुहमध्यगे[११२] ।
स्मरन् नारायणं देवं तद्गतेनान्तरात्मना[११३] ।।५६।।

(हृत्सरोरुहमध्यगे अस्मिन् ब्रह्मपुरे स्मरन् तद्गतेन अन्तर्-आत्मना देवं नारायणं स्मरन्।)

हृदयकमल के अन्तर्गत इस ब्रह्मपुरी में ध्यान करते हुए स्वयं उसमें तल्लीन होकर नारायणदेव का चिंतन करना चाहिए।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विधिनोक्तेन मार्गेण कालजित् सोऽपि पुत्रक[११४] ।।५७।।

((हे) पुत्रक! विधिनोक्तेन मार्गेण सः अपि कालजित् (भवति)।)

हे पुत्र! शास्त्रोक्त मार्ग से ऐसा करनेवाला भी कालजित् होता है ।

यद्वा समाधिमभ्यस्य वञ्चयेत् कालमागतम्[११५] ।।५८।।

(यत् वा समाधिं अभ्यस्य आगतं कालं वञ्चयेत्।)

अथवा समाधिक्रम का अभ्यास कर आगत मृत्यु को टाल देना चाहिए ।

समाधिः शून्यता प्रोक्ता सर्वारम्भविवर्जिता[११६] ।
समाधिः समतावस्था जीवात्मपरमात्मनोः[११७] ।।५९।।

(सर्वारम्भविवर्जिता शून्यता समाधिः प्रोक्ता, जीवात्म-परमात्मनोः समता अवस्था समाधिः (प्रोक्ता)।)

सभी संकल्पों से रहित शून्यवस्था को समाधि कहते हैं। जीवात्मा और परमात्मा की एकरूपता की अवस्था समाधि है।

शून्यता सा तु विज्ञेया ध्यानादिभिरसंयुता[११८] ।
शून्यतामभ्यसेन्नित्यं सर्वारम्भविवर्जिताम्[११९] ।।६०।।

(ध्यानादिभिः असंयुता सा तु शून्यता विज्ञेया सर्वारम्भ-विवर्जितां शून्यतां नित्यमभ्यसेत्।)

ध्यानादिक्रम से रहित जो अवस्था है उसे शून्यता कहते हैं। सभी संकल्पों से रहित ऐसी शून्यावस्था का नित्य अभ्यास करना चाहिए।

भावाभावविनिर्मुक्तं भावयेद्यः समाधिना[१२०] ।
सोऽपि पुत्र विशेषेण मृत्युजिद्योगविद्भवेत्[१२१] ।।६१।।

(यः समाधिना भावाभावविनिर्मुक्तं भावयेत् पुत्र! सः अपि विशेषेण मृत्युजित् योगवित् भवेत्।)

जो योगी समाधिक्रम के द्वारा भावाभावविरहित तत्त्व का चिंतन करते हैं, हे पुत्र! वे ही विशेष रूप से मृत्यु को जीतने वाले तथा योगवेत्ता होते हैं ।

✻ इति वसिष्ठसंहितायां योगकाण्डे षष्ठोऽध्यायः ।

इस प्रकार वसिष्ठसंहिता योगकाण्ड का छठा अध्याय समाप्त हुआ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परिशिष्ट -१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परिशिष्ट - १

संकेत-सूची

अ. - अध्याय

कुमार. - कुमारसम्भवः

ख्रि. - ख्रिस्ताब्धः

दउ. - दर्शनोपनिषद्

नागोजी. - नागोजीभट्टकृता पातञ्जलसूत्रवृत्तिः

नित्याप्र. - नित्याचारप्रदीपः (नरसिंहवाजपेयिकृतः)

बृया. - बृहद्योगियाज्ञवल्क्यस्मृतिः (कैवल्यधामप्रकाशनम्)

ब्रविज्ञा. - ब्रह्मसूत्रव्याख्यानं विज्ञानभिक्षुकृतम्

ब्रास. - बाह्मणसर्वस्वं हलायुधकृतम् (कलकत्ता १९६०)

भावागणेश. - भावागणेशकृता पातञ्जलवृत्तिः

मनु. - मनुस्मृतिः

मल्ली. - मल्लीनाथः

मेधा. - मेधातिथिः

य. - वसिष्ठसंहिता योगकाण्डमातृका
(भण्डारकर प्राच्य विद्या शोध संस्थान सं. २९७। १८९२ - ९५)

याज्ञ. - याज्ञवल्क्यस्मृतिः

योगवा. - योगवार्तिकं विज्ञानभिक्षुविरचितम्

योया. - योगयाज्ञवल्क्य (श्रीदिवाणजू संपादितः)

योसिचं. - योगसिद्धान्तचन्द्रिका नारायणतीर्थविरचिता (चौखंवा १९११)

र. - वसिष्ठसंहितामातृका (भ. प्रा. शो. सं. - २१९। १८८४-८६)

रघु. - रघुवंशः

राघव. - राघवभट्टकृता श्री श्रीशारदातिलकतन्त्रटीका (कलकत्ता १९३३)

ल. - वसिष्ठसंहितामातृका (प्राज्ञ पाठशाला, वाई)

व. - वसिष्ठसंहितामातृका (इन्डिया आफिस लायब्रेरी, कीथ)

वसं. - वसिष्ठसंहिता योगकाण्डम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श. - वसिष्ठसंहितामातृका (इन्डिया आफिस लायब्रेरी, एगेलिंग)

श्लो. - श्लोक :

ष. - वसिष्ठसंहितामातृका (बोडलियन लायब्रेरी)

सूज्ञा. - सूतसंहिता ज्ञानयोगखण्डः

हठप्र. - हठप्रदीपिका

हठप्रटी. - हठप्रदीपिकाटीका ब्रह्मानंदकृता

ग्रन्थ के आधारभूत हस्तलेखों की सूची

वसिष्ठ संहिता योगकाण्ड के आधारभूत ६ हस्तलेख निम्नलिखित रहे हैं -

य - भण्डारकर प्राच्यविद्या शोधसंस्थान सं २९७।१८९२ - ९५ लिपि देवनागरी.

र - भ. प्रा. शो. सं. - २१९।१८८४ - ८६ लिपि देवनागरी-
यह सर्वाधिक प्राचीन हस्तलेख है जिसे सम्पादकों ने पाठ-निर्धारण के लिए अन्य हस्तलेखों की तुलना में अधिक प्रामाणिक माना.

ल - प्राज्ञ पाठशाला, वाई ३७२/३९७० लिपि देवनागरी.

व - इन्डिया आफिस लायब्रेरी, लन्दन, कीथ ५९९५ लिपि बंगाली.

श - इन्डिया आफिस लायब्रेरी, लन्दन, एगेलिंग २४३२ संवत् १७०१

ष - बोडलियन लायब्रेरी आक्सफोर्ड विश्वविद्यालय विल्सन ४८३ बंगाली लिपि में भोजपत्र पर लिखा गया.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परिशिष्ट - २

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परिशिष्ट - २

हस्तलिखितग्रन्थान्तरेषु पाठभेदाः

प्रथमोऽध्यायः

* (इतः प्रभृति ८० तम श्लोकपर्यन्तं **य** मातृकामनुसृत्य प्रायशः पाठो मूले दर्शितः। तदनन्तर **र** मातृकामवलम्ब्यैव प्रायशः पाठः मूले प्रदर्शित इत्यवधेयम्। ओं नमः सिद्धं।। अथ वसिष्ठसंहिता लिख्यते।। ओं वशिष्ठं इत्यादि **य**. आद्या ८० श्लोका न सन्ति र मातृकायाम्

आद्या १० श्लोका न सन्ति **ल** मातृकायाम्

ओं नमो गणेशाय इत्यारम्भेऽधिकम् **ब** मातृकायाम्.

ओं नमः शिवाय।। इत्यारम्भेऽधिकम् **श** मातृकायाम्.

आद्याः ६ श्लोका न सन्ति **ष** मातृकायाम्)

१ याज्ञवल्क्यं मुनिश्रेष्ठं सर्वज्ञं ज्ञाननिर्मलम् **योया**. १.१

२ सर्वशास्त्रार्थतत्त्वज्ञं सदा ध्यानपरायणम् **योया**. १.१

३ सर्वभूतसमं शान्तं..**श**.

४ **योया**. १.४-५; अयं श्लोकः तृतीय श्लोक पूर्वार्धोत्तरम् **व**
कुलज्ञं सर्वं..परमार्थ प्रयोजनम् **व**.
अयं श्लोकः चतुर्थ श्लोक पूर्वार्धोत्तरम् **श**.

५ जितक्रोधं जिताहारं जितामयम् **योया**. १.२

६ सौम्यं संध्योपासनतत्परम् **योया**. १.३

७ ब्राह्मणैश्च समावृतम्। **योया**. १.४, ब्राह्मणैश्च सुशोभितम् **व**.

८ नित्यकर्मरतं नित्यं **व**, **श**; पौर्वाहिक **श**, धर्मतरं **य**.

९ महाकारुणिको मुनिः **व**; दुभमौ गार्ग्येतद्वाक्यमब्रवीत्। **योया**. १.७

१० शुद्धयान्वितः **य**; (मुद्रितः पाठः **व श** मातृकयोर्दृश्यते.)

११ **व श** मातृकयोरेवेदं वाक्यं समुपलभ्यते।

१२ **योया**. १.८, **श**; हितेरतः **य**. **व**.

१३ दुःखसमाश्रयात् **श**.

१४ इदमर्धं नास्ति **व**; जरान्वितात् **श**

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१५ सर्वज्ञानमयादस्मान्मुक्तोऽहं स्यां सदा सुखी **श.**
(इतः प्रभृति ष मातृकारम्भः, "श्रीदुर्गा। सर्वज्ञानमयो यस्मान्मुक्तोऽहं स्यां सदा सुखी। पुत्रेणैवं.." इत्यादि रूपः।)

१६ एवं पृष्टः स भगवान् सभामध्ये स्त्रिया तया **योया १.९**; शक्तिना ब्रह्मवादिना **व.**

१७ ऋषीनालोक्य नेत्राभ्यां वाक्यमतदभाषत **योया** १.९ **य**

१८ याज्ञवल्क्य उवाच **योया**. १.१०

१९ ..ते गार्गि ब्रह्मविदां वरे **योया**. १.१०, शक्तिर्बुद्धि..**ष.**

२० वक्ष्यामि योगसर्वस्वं ब्रह्मणा कीर्तितं पुरा **योया.** १.१०..मुपायं भयनाशनं **श.** वक्ष्यामि सर्वसुखदमुपायं भवनाशनं **ष.**

२१ इत्युक्त्वा ब्रह्मविच्छ्रेष्ठो याज्ञवल्वयस्तपोनिधिः **योया**. १.११; ब्रह्मवित्तमः **श, ष.**

२२ नारायणं जगन्नाथं सर्वभूतहृदिस्थितम् **योया**. १.१२; ध्यायन्नारा ..**श.**

२३ (इतः प्रभृत्येव **ल** मातृका) वासुदेवं जगद्योनिं **व, श, ल** वासुदेवं जगन्नाथं ध्यानध्येयं निरञ्जनं **ष**; वासुदेवं जगद्योनिं योगिध्येयं निरञ्जनम् **योया**. १.१२.

२४ नित्यं जगत्कर्तारमीश्वरम् **ल**; परमात्मानमीश्वरम् **व** आत्मानं परमं नित्यं परमात्मानमीश्वरं **ष**. आनन्दममृतं नित्यं परमात्मानमीश्वरम् **योया**. १.१३.

२५ च समाहितः **श.**, ध्यायन् हृदि हृषीकेशं मनसा सुसमाहितः। **योया**. १.१३

२६ नेत्राभ्यां तां समालोक्य कृपया वाक्यमब्रवीत् **योया**. १.१४ कृपया इदमब्रवीत् **व.**, **ष.**; शक्तिं चालोक्य कृपया वाक्यमेतदभाषत **श.**

२७ एह्येहि गार्गि सर्वज्ञे सर्वशास्त्रविशारदे **योया**. १.१४, पितृभक्त जितेंद्रिय **श.**

२८ योगं वक्ष्यामि विधिवद्धात्रोक्तं परमेष्ठिना **योया**. १.१५; प्रोक्तं यत् पूर्वं मम मुक्तिदं **ल.**; ब्रह्मणा पूर्वं प्रोक्तं मम मुक्तिदम् **ष.**

२९ पद्मासने समासीनं **योया**. १.१६; पद्मासीनं सुखासीनं **व.**; नास्तीदमर्धं **ल.** मातृकायाम्।

३० ब्रह्माणं परमेष्ठिनम् **योया**. १.१६, **श, ष.**, नास्तीदमर्धं **ल.** मातृकायाम्।

३१ **योया**. १.१७; स्तोत्रं प्रणम्य च **ष.**

३२ **व.**, **श.**, यन्मां त्वं परिपृच्छसि **योया.** १.१७, **श.**;
नास्तीदमर्धं **ल.** मातृकायाम्; निदमेवार्थ **य.**

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

३३ चतुर्मुख पितामह **योया** १.१८; सुप्रसन्नवरानन **ष.**

३४ अनेकशास्त्रसिद्धान्तं भ्रान्तचित्तो भ्रमातुरः **व.**; अनेकमतसिद्धान्त भ्रान्तचित्तो भ्रमाम्यहम् **श**; पारंगं योगसिद्धान्त वेदागमपरायण **ष.**, इदमर्धनोपलभ्यते **ल.** पुस्तके

३५ तन्नित्यं परमं **व.**, तत्त्वं नित्यं परं पदं **श.**, तत्त्वं नित्यं परात्परं **ष.**, इदमर्धं नास्ति **ल.** मातृकायाम्।

३६ आनन्दमक्षर **ल.**, मक्षयं गुह्यम् **व.**, **श.**, मव्ययं गुह्यम् **ष.**

३७ मयैवमुक्तो द्रुहिणः स्वयं ...**योया**. १.१९, नास्तीदमर्ध **ल.** मातृकायाम्

३८ मामालोक्य प्रसन्नात्मा ज्ञानकर्माण्यभाषत **योया**. १.२०; ..मां स प्रसन्नास्यो मम तत्रैवमब्रवीत् **ल.**, ..न्नात्मा मम तत्वेदमब्रवीत् **व.**, .. न्नाङ्गो मम तत्रैवमब्रवीत् **श.**; ..न्नात्मा मम तत्रेदमब्रवीत् **ष.**

३९ ज्ञानस्य द्विविधौ .. **योया**. १.२०; ज्ञानस्य द्विविधावेतौ ..वेद-बोधितौ **ल.**, वेदबोधितौ **श.**, द्विविधो ज्ञेयो पन्थानो वेददर्शिनः **ष.**

४० अनुष्ठितौ तौ विद्वद्भिः प्रवर्तक.. **योया**. १.२१.

४१ वर्णाश्रममोक्तं कर्मैव विधिवत् कामपूर्वकम् **योया**. १.२५,
(प्रथमपादस्याष्टाक्षरमितं स्थलं रिक्तम् **ल.** मातृकायाम्);
वर्णाश्रमोक्तं कर्मैव कायसंकल्प ..**व.**, वर्णाश्रमोक्तकर्मैव **ष.**

४२ ..भवेदेतत् पुनरावृत्तिहेतुकम् **योया**. १.२२, संसारपरिवर्तनात् **ल.**, जन्ममृत्युप्रवर्तनात् **श.**

४३ (संयुक्तमित्यक्षरत्रयस्थाने रिक्तं स्थलं दृश्यते **ल.**); सर्वसंकल्पवर्जितम् **श.**, कामसंकल्पवर्जितम् **ष**

४४ निवर्तकं भवत्येतज्जन्मनस्तु **ल.**, ..न्ममृत्युनिवर्तनात् **श.**, **ष**

४५ निवर्तकं भवेदेतत्द्विविधं मुनयो विदुः **व.**, **श.**, **ष.**

४६ **ब्रविज्ञा**. ८,..चैव प्रत्येकं **ष**, द्विविधंमुक्ति **ब्रविज्ञा** ८, ५४६, क्रियैवैत द्यत्तद्विहितसाधनैः **श.**

४७ ..बहिः क्रियाभिश्च यत्तद्विहितसाधनैः **ब्रविज्ञा** ८, ५४६, क्रियैवैत द्यत्तद्विहितसाधनैः **श.**

४८ आभ्यंतरं तु मनसा विध्यनुष्ठानमात्मनि। **ब्रविज्ञा**. ८, आभ्यन्तरं च मनसाविध्यनुष्ठानमात्मनि **ब्रविज्ञा** ५४६; बुद्ध्यैव बुद्ध्यानुष्ठान र, तु विध्येवं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विध्यनुष्ठानमात्मनि **श.**; आभ्यन्तरं च बुद्ध्यैव बुध्वानुष्ठानमात्मवत् **ष.**, निष्ठानमा ..**य.**

४९ तयोरन्यतरत् कुर्यान्नित्यं कर्म यथाविधि **ब्रविज्ञा.** ८, योगवार्तिक २.३१, तयोरन्यतमंकु **ब्रविज्ञा.** ५४६, नित्यकर्म **ल.**, तयोरन्यतरं कुर्यान्नित्यं कर्म यथाविधि **व.**, तयोरन्यतमत् कुर्यान्नित्यं **श.**

५० सदानन्दं समाप्नुयात् **व.**

५१ ज्ञानिना ज्ञानिना वापि..हस्य धारणम् **ब्रविज्ञा.** १०, ५४६ यावद्देहस्य धारणं **ल.**, **श.** **ष.**

५२ **ब्रविज्ञा.** १०, ५४६, **श.** र्णाश्रमं प्रोक्तं **य.**

५३ इति मे कर्मसर्वस्वं योगरूपंच **योया.** १.४० इत्येतत्. इत्येतत् **ल.**, कर्मसर्वज्ञः कर्मकाण्डहिते रतः **व**, इत्येतते ज्ञानसर्वस्वं **श.**, इत्येतज्ज्ञानसंपत्तिः कर्म **ष.**

५४ उपदिश्य ततो ब्रह्मा **योया.** १.४०, **ष.**, उपदिश्य तदा ब्रह्मन् **य.**, **र.**

५५ **ल.**, **श.**, ज्ञानेन सह कुर्वतः **य.**, विप्रेन्द्र विधिवत् कुरु धर्मतत् **व.**, मति विप्रेन्द्र मुक्तये कुरुकर्मतत् **ष.**

(एतच्चिह्नाङ्कितं पङ्क्तिचतुष्टयं **'य'** मातृकायां नास्ति।

'ल'. पुस्तकस्थं तदत्रविनिवेशितं वेदितव्यम्।)

५६ श्रुत्वैतद्याज्ञवल्क्योक्तं वाक्यं गार्गी मुदान्विता। **योया.** १.४१,एतत् श्रुत्वा वशिष्ठोक्तं **व.**, शक्तिमतां वरः **ष.**

५७ पुनः प्राह मुनिश्रेष्ठमृषिमध्ये वरानना **योया.** १.४१, मुनिश्रेष्ठः **य.**, प्रन्वितः श्रद्धयाचितः **ष.**

५८ (नास्तीदं वाक्यं **व.** पुस्तके), गार्ग्युवाच। **योया.** १.४२

५९ ज्ञानेन सह योगीन्द्र विध्युक्तं कर्म कुर्वतः। **योया.** १.४२

६० त्वयोक्तं मुक्तिरस्तीति तयोर्ज्ञानं वद प्रभो। **योया.** १.४२, मुक्तिरुक्ता हि तद्द्वाभ्यां **ल.**, **व.**, तयोर्ज्ञानं च मे वद **श.**, ... रुक्ता हि ने पूर्वं **ष.**

६१ भार्यया त्वेवमुक्तस्तु याज्ञवल्क्यस्तपोनिधिः। योया. १.४३, वशिष्ठः प्रीतिमानसः **व.**, मुक्तस्य वशिष्ठं प्रीतिमानसः **ष.**

६२ तां समालोक्य कृपया ज्ञानरूपमाषत। **योया.** १.४३, ..लोक्य कृपया **ल**, **श.**, कृपया पत्रमालोक्य ज्ञानरूपभराभवत् **ष.**

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

६३ **श.** मातृकायामेवेदं वाक्यं दृश्यते।

६४ योगश्चाष्टाङ्गसंयुतः। **योया**. १.४४, ...त्मनि संस्थितः **ल**, **व**, **श**, ..त्मनि संस्थितिः **ष.**

६५ संयोगो योग इत्युक्तो जीवात्मपरमात्मनोः। **योया**. १४४, **मल्लीरघु**. ८.२४, सर्व कर्मण उच्यते **व.**

६६ सर्वाण्यङ्गानि वक्ष्यामि **ल.**, तज्ज्ञानं सम्य..**ष.**

६७ समाहितमना भूत्वा **ल.**, **व.**, **श.**, **ष**

६८ तथा चासनमिष्यते **ब्रविज्ञा**. ५७२, आसनं च तथैव च **योया**. १.४६, यमश्च नियमश्चैव तथैवासनमेव च। **सूज्ञा**. १३.१, **दउ**. १.४

६९ गार्गि प्रत्या ...**योया**. १.४६, विप्र प्रत्याहारस्तथापरः **सूज्ञा**. १.३२ स्तथाब्रह्मन् प्रत्याहारस्ततः परम् **दउ**. १.५

७० **ब्रविज्ञा**. ५७२, तपोनिधे **श.**, योगाङ्गानि वरानने **योया**. १.४७, धारणा च तथा ध्यानं समाधिश्चाष्टमो मुने **सूज्ञा** १३.२, ध्यानं समाधिश्चाष्टमं मुने **दउ**. १.५

७१ तदन्यान्यान्तराणि च **ल.**, तदन्यान्यन्तराणि च **ब्रविज्ञा**. ५७२

✷ अष्टात्मकमिदं विद्धि पवित्रं पापनाशनं।
ज्ञानं गुह्यतमं प्रोक्तं कीर्तितं ते तपोधन। इत्याधिकः श्लोकः **ब्रविज्ञा.** ५७२

७२ यमाश्च दशधाः प्रोक्ता **व.**

✷ आसनानि च तावन्ति यावत्यो जीवयोनयः इत्यधिकम् **श.**

७३ आसनान्युत्तमान्यष्टौ त्रयं तेषूत्तमोत्तमम् **योया** १.४८

७४ सुखरूपाणिपुत्रक **ल. व.**, मुख्यरूपाणि पु ..**श.**, चत्वारि सूक्ष्मरूपाणि यानि च **ष.**

७५ **ल.**, **व.**, **श.**, प्राणायामस्तथा शक्ते **य.**, द्विधाप्रोक्तः **ष.**, ..हारश्च पञ्चधा **योया.** १.४८

७६ पञ्चधा प्रोक्ता ध्यानं षोढा प्रकीर्तितम् **ल.**, **व.**, **श.**, **ष.**, **योया**. १.४९

७७ समाधिस्तावति प्रोक्ता यावत् ध्यानं **ल.**, तावदेनं पृथक् श्रृणु **व.**, समाधिस्तावति प्रोक्ता यावत् ध्यानं **ल.**, तावदेनं पृथक् श्रृणु **व.**, समाधिस्तावदेवोक्तो यावद्ध्यानं पृथक् श्रृणु **श.**, समाधिस्तावता प्रोक्तो ध्यानं च द्विविधः पृथक् **ष.**

✷ लयमेकं समुद्दिष्टं श्रृणु पुत्र वचो मम इत्यधिकम् **ष.**

७८ ..चर्य दयार्जवम् **योया**. १.५०, **सूज्ञा** १.३३, **दउ** १.६,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

..चर्यंक्षमाधृतीः **ल.**, क्षमा धृतिः **व.**, **श.**, **ष.**

७९ क्षमाधृतिर्मिताहारः शौचं त्वेते यमा दश। **योया.** १.१५१, क्षमा धृतिर्मिताहारः शौचं चेति यमा दश। **सूज्ञा** १.३३, **दउ** १.६, चेति यमा दश **ष.**

८० **योया**. १.५१

८१ महिंसा सर्वयोगिभिः ल., महिंसात्वेन योगिभिः श., **योया**. १.५२, अहिंसा चैव योगिभिः **ष.**

८२ क्लेशजन्मैव जन्तुषु **योया**. १.५२, विध्युक्ता चैव हिंसा स्यात् क्लेशदानैव जंतुषु **ल.**, क्लेशजं नैव जंतुषु **व.**, विध्युक्तके त्वहिंसा स्यात् क्लेशजान्येव जंतुषु **श.**

८३ वेदेनोक्ते ..**योया**. १.५३, दभिचारो हि कर्म तत् **व.**, दिकर्मवत् **श.**, दिकर्मकृत् **ष.**

८४ **ल.**, प्रोक्तं निषिद्धं नाति भाषितम् **य.**, न यथार्थाभिभाषणम् **योया**. १.५३ **श.**, नियमार्थाभिभाषणम् **व.**

८५ हितमेतत् ब्रवीमि ते **श.**

८६ निःस्पृहः **ल.**, परद्रव्येषु निः स्पृहा योया. १.५४, **व.**, **ष.**, द्रव्येसु **य.**

८७ मिति सा प्रोक्ता ऋषिभिस्तत्त्वदर्शिभिः **योया**. १.५४

८८ सर्वावस्थासु सर्वदा **ल.**, **योया**. १.५५, **व.**, **श.**

८९ मैथुनत्यागो **योया**. १.५५, सर्वदा मैथुनत्यागो **व.**, **श**।

९० संगतिर्या विधानतः। **योया**. १.५७

९१ चर्यं तु तत्..। **योया**. १.५७ .

९२ ..वा गुरोर्नित्यं ब्रह्मचर्यमुदाहृतम् : **योया**. १.५९
अयं श्लोकः यमातृकायां नोपलभ्यते **ल.** पुस्तकमनुसृत्य सोऽत्र निवेशितः।

९३ वियोगेष्वपि संपदाम् **योया**. १.६५
आत्महानौ च ..गेष्वपि संपदां **श.**

९४ तयोः प्राप्तौ च सर्वत्र **योया**. १.६६

९५ **योया**. १.६४, प्रियाप्रियेषु भृत्येषु **ष.**

९६ क्षमा सैवेति विद्वद्भिर्गदिता वेदवादिभिः **योया**. १.६५, क्षमा सैवेति गदिता विद्वद्भिर्वेदबाधिभिः **व.**, क्षमा सैवेति गदिता विद्वद्भिर्ब्रह्मवादिभिः **श.**, क्षमा एवेति कथिता मुनिभिर्वेदपारगैः **ष.**

९७ आत्मजे बान्धवे वापि मित्रे वोऽपि च सर्वदा **ष.**

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

९८ आवर्तते कृपाबुद्धिर्दयैषा **ल.**, आर्ते तत्र कृपाबुद्धिर्दयैषा परि.. **व.**, आर्ते तथा कृपाबुद्धिर्दयैषा परि ..**श.**

आर्तस्य तु रक्षदभिर्दया सा परिकीर्तिता **ष ।**

९९ **योया**. १.६३, कायकर्मभिः **श**..चदन्येषु मनोवाक्कायकन्दरं **ष.**

१०० **योया**. १.६४. प्रवृत्तौच निवृत्तौवा **ष.**

१०१ मुनेर्भक्ष्याः **योया**. १.६६, मुनेः प्रोक्ताः **ल.**, मुनेर्भक्तं वानप्रस्थस्य षोडश वसिष्ठ **ध. सू.** ६.२०, मुनेर्भक्ष्यं ..रण्यवासिना। अपराकं १.३१

१०२ मुद्रितः पाठः **व.** पुस्तके। यथेष्टै च गृहस्थानां द्वात्रिंशद्ब्रह्मचा ..**य.** द्वात्रिंशच्च गृहस्थानां **ल.**, **योया**. १.६७, **श.**, द्वात्रिंशत्तु गृ ..**ष.**, द्वात्रिंशत्तु गृ.. अमितं ब्रह्मचारिणः अपरार्क १.३१.

